आगमोद्धारक-ग्रन्थमालाया एकोनपञ्चाशं रत्नम्

णमोत्थु णं समणस्स भगवओ महावीरस्स

आगमोद्धारक-आचार्यप्रवर-श्री आनन्दसागरसूरीश्वरेभ्यो नमः

आचार्य श्री मुनिचन्द्रसूरिरचिता

पाक्षिक-सप्तत्यपराभिधाना—

# आवश्यक-सप्ततिः

श्री महेश्वराचार्यकृतवृत्तियुता

卐

संशोधकः—

पूज्य-गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागरसूरीश्वरशिष्यः

शतावधानी-मुनिराज लाभसागरगणिः

वीर सं० २४९८ विक्रम सं० २०२८ आगमोद्धारक सं० २२

प्रतयः ३०० ] * [ मूल्यम् १=५०

आगमोद्धारक-ग्रन्थमालाया एकोनपञ्चाशं रत्नम्

णमत्थु णं समणस्स भगवओ महावीरस्स

आगमोद्धारक-आचार्यप्रवर-श्री आनन्दसागरसूरीश्वरेभ्यो नमः

आचार्य श्री मुनिचन्द्रसूरिरचिता

पाक्षिक-सप्ततयपराभिधाना—

# आवश्यक-सप्ततिः

श्री महेश्वराचार्यकृतवृत्तियुक्ता

卐

संशोधकः—

पूज्य-गच्छाधिपति-आचार्य-श्रीमन्माणिक्यसागरसूरीश्वरशिष्यः

शतावधानी-मुनिराज लाभसागरगणिः

वीर सं० २४९८ विक्रम सं० २०२८ आगमोद्धारक सं० २२

प्रतयः ३०० ] * [ मूल्यम् १=५०

प्रकाशक--

आगमोद्धारक ग्रंथमाला ना एक कार्यवाहक

शा. रमणलाल जयचन्द

कपडवंज (जिल्ला—खेडा)

५००=०० गणिवर्य श्री चिदानन्दसागरजी महाराज ना सदुपदेशथी बोडीमोरा जैन संघना ज्ञानखाता तरफ थी।

२५१=०० विदुषी साध्वीजी श्री मलयाश्रीजी महाराजनी सुशिष्या साध्वीजी श्री कैवल्यश्रीजीए करेल ५०० आयंबिल नी तपश्या निमित्ते ज्ञानभक्तिमांथी।

मुद्रक—

शांति प्रिन्टर्स इन्दौर-१

# प्रकाशकीय–निवेदन

आ 'आवश्यक सप्ततिः' अपर नाम 'पाक्षिक-सप्ततिः' नामना ग्रन्थ ने आगमोद्धारक–ग्रंथमाला ना ४९ मा रत्न तरीके प्रगट करता अमने बहु हर्ष थाय छे।

आना प्रकाशनमां सुरत जैनानन्द पुस्तकालय तथा छाणी प्रवर्तक श्री कान्तिविजयजी शास्त्र संग्रह नी सोमचंदभाई द्वारा प्राप्त थयेल हस्तलिखित प्रत नो उपयोग कर्यो छे।

आ नी प्रेसकोपी तथा संशोधन पू० गच्छाधिपति आचार्य श्री माणिक्यसागरसूरीश्वरजी म० नी पवित्र–दृष्टि नीचे शताबधानी मुनिराज श्री लाभसागरजी गणिए करेल छे. ते बदल तेओ श्रीनो तेमज जेओए आना प्रकाशन मां द्रव्य तथा प्रति आपवानी सहाय करी छे ते बधा महानुभावो नो आभार मानीए छीए.

लि.

—प्रकाशक

# शुद्धि-पत्रक

| पृष्ठ | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३ | १६ | ष्यादु | ष्यांदु |
| ४ | ३ | विंशति | विं शति |
| ६ | २ | ठ यइ | ठायइ |
| ६ | ४ | त द्वरहे | तद्विरहे |
| ६ | १२ | शय्ययां | शय्यायां |
| ७ | ८ | असङ्क- | अतिसङ्क- |
| ७ | ११ | सयमो | संयमो |
| ७ | १४ | परेमि दुगं तु | बरिसे दुगंत |
| ७ | १७ | काऊं | काउं |
| ८ | ३ | विश्वग् | विष्वग् |
| ८ | ८ | प्रतिकम- | प्रतिक्रम- |
| ९ | १३ | कण | कण् |
| १० | ५–१४ | पाउसिए | पाओसिए |
| १४ | ३ | च द्दसि | चउद्दसि |
| १५ | ८ | माह्वना | माह्वाना |
| १७ | १६ | निर्विचार | निर्विचार |
| १७ | १७ | करण | करणं |
| १८ | १३ | करण | करणं |
| १८ | १७ | व | च |
| २७ | १२ | गमन | गमनं |
| ३० | १८ | तिथ: | तिथी: |
| ३१ | २२ | चद्दउसीसु | चउद्दसीसु |
| ४२ | २३ | भाव भावें | भावाभावे |

# विषयानुक्रम


| क्र. | विषय | पृष्ठ संख्या |
|---|---|---|
| १ | आवश्यकस्य स्वरूपम् । | ३ |
| २ | क्षेत्रावश्यकनिरूपणम् । | ५ |
| ३ | आवश्यककरणस्य स्थानचतुष्कम् । | ५ |
| ४ | अभिशय्याऽभिनिषीधिकशय्ययो: स्वरूपम् । | ६ |
| ५ | निजगुरो: स्थापना । | ८ |
| ६ | दैवसिकप्रतिक्रमणस्य समयमर्यादा । | ९ |
| ७ | चतुर्दश्यामेव पाक्षिकप्रतिक्रमणस्य प्रमाणानि । | ११ |
| ८ | चतुर्दश्यामेव चतुर्थस्य प्रमाणानि । | १३ |
| ९ | दश चित्तसमाधिस्थानानि । | १४ |
| १० | चतुर्दश्यां सर्वचैत्यसाधुवन्दनम् । | १७ |
| ११ | पर्युषणाविधि: । | १९ |
| १२ | अनागतदिनचतुष्केन कल्पकर्षणम् । | २१ |
| १३ | पर्युषणाष्टमोत्तरपारणदिनम् । | २३ |
| १४ | कालाकालचारिण्या साध्व्या: स्वरूपम् । | २७ |
| १५ | आर्यरक्षितसूरे: पूर्वं साध्वीनां साध्वी पार्श्वे आलोचना । | |
| १६ | आलोचनादानविधि: । | २९ |
| १७ | पर्वसु क्रियमाणस्य तपसो गुणा: । | ३० |
| १८ | आलोचनादाने वर्ज्यतिथय: । | ३० |
| १९ | अष्टादश गणराजान: । | ३३ |
| २० | अवमरात्रतिथिमासा: । | ३५ |
| २१ | विद्यापरिपाटिदानसमय: | ३७ |
| २२ | आचरणालक्षणम् । | ४० |
| २३ | जीवत्स्वामिन: पुर: देवीप्रभावतीनाट्यम् । | ४४ |
| २४ | सूत्रे देशसर्वग्रहणोदाहरणं तथा सूत्रे उत्क्रम-क्रमयुक्त वस्तुकथनोदाहरणम् । | ४७ |
| २५ | उत्सूत्रप्ररूपणाया: संसारहेतुत्वम् । | ५० |
| २६ | सम्प्रति चतुर्दश्यां चतुर्मासककरणस्य हेतुद्वयम् । | ५१ |
| २७ | भावावश्यकनिरूपणम् । | ५३ |
| २८ | आवश्यकस्य पर्याया: । | ५४ |

# परिचय

## णमोत्थु णं समणस्स भगवओ महावीरस्स

जैन इतिहासनुं विहंगावलोकन करतां जणाशे के भगवान् श्री ऋषभदेव-परमात्माथी आजदिनपर्यंत जिनेश्वरपरमात्माना शासन उपर ऐक या बीजी रीते बाह्य तेमज आंतरिक आक्रमणो थया छे, अने आ आक्रमण आजे पण **शांति, परमतसहिष्णुता, सर्वधर्म-समभाव, सर्व-धर्मसमन्वय, बिनसांप्रदायिकता** विगेरे अनेक सुंदरशब्दोना बहाना नीचे चालुज छे. (अने आ प्रत्ये सेवातुं दुर्लक्ष भविष्यमां शासन माटे हानिकारक बनशे. )

सत्य हंमेशां एकज होय छे अनेक नहिं. परंतु सत्यनो स्वांग सजीने अनेक असत्यो सत्यने पडकारवा हंमेशां तैयार होय छे. आथी आंतरिक शत्रुओ विषेनी साचो समज आपवा अने प्रभु शासनना सन्मार्गने वधु प्रकाशित करवा आपणा महान् उपकारी पूर्वमहापुरुषोए अनेक उपायो कर्या छे, तेमांनो एक उपाय 'ग्रंथ-रचना' छे. आवो एक अपूर्व ग्रंथ 'सिरि आवस्सय - सत्तरी' छे. आ ग्रंथनी अंदर मुख्यत्वे पूर्णिमामतना स्थापक आ० प्रभाचंद्रनी उत्सूत्रप्ररूपणानुं खडन करवा पक्खी विगेरे पर्वतिथिनी आराधनानुं स्पष्ट रीते शास्त्रीय रीते निरूपण करेलुं होवाथी तेनी साथे आ० प्रभाचंद्र अने तेमने स्थापेल नविन उत्सूत्रप्ररूपणात्मक पूर्णिमागच्छ संकलाएल होवाथी तेओ विषे टुंकमां उल्लेख करी ग्रंथ, ग्रंथकार अने वृत्तिकार विषे विचारीशुं.

**स्थापकः**—पूर्णिमागच्छना स्थापक आ० प्रभाचंद्र[1] आ० **सर्वदेवसूरिना** आठ पट्टधरोमांना मोटा पट्टधर आ० **जयसिंहसूरिनी** पाटे थया. तेओ वडगच्छमां वडिल हता अने तेमने 'वादीभसूरि' नुं बिरुद हतुं. आ० **मुनिचंद्रसूरि** तेमनाथी नाना हता, पण संघमां तेमनी लोकप्रियता वधु हती. ते आ० प्रभाचंद्र माटे ईर्ष्यानुं कारण बनी अने तेथी आ० प्रभाचंद्रे सवत् ११५९ मां आ 'पूर्णिमागच्छ' नामना मतनी स्थापना करी. आ नवीनमतनी प्ररूपणाथी तेओ वडिल विद्वान् वादीन्द्र होवा छतां

---

१ टिप्पण- गुरुतत्त्वप्रदीपकार प्रस्तुतआचार्य, मुनिचन्द्रसूरि, मानदेवसूरि अने शांतिसूरि आ चारे ने एक गुरु ना शिष्य तरीके जणावे छे.

पण शासनमांथी फेंकाइ गया तेमनी उज्ज्वल कारकीर्दीनो चंद्र झंखवाइ गयो नवीनमतनी प्ररूपणाथी शासनना एक आंतरिकशत्रुमां वधारो थयो. ईर्ष्याना विषम चक्करे ज्ञानी अने प्रतिभावंत आचार्य ने पण अज्ञानना घेरा अंधकारमां धकेली दीधा. तेनो आछो ख्याल पण तेमनी नवीनमतनी प्ररूपणा थी स्पष्ट समजाय छे.

**प्ररूपणा:**—तेओनी मुख्य प्ररूपणा नीचे मुजब छे—

१. साधु प्रतिष्ठा (अंजनशलाका) न करावी शके, २ पाक्षिक प्रतिक्रमण चतुर्दशी ने बदले पूनमे करवु, ३ पांचमा आरामां छ मासी ( तप ? ) न होय अने ४ लघुदीक्षा बाद छ महिना पहेलां उपस्थापना (वडी दीक्षा) न अपाय, विगेरे.

**गच्छ:**—आ गच्छनी मुख्य प्ररूपणा पूनमे पक्खी करवानी होवाथी तेमने स्थापेल नविनमतनु नाम 'पूर्णिमागच्छ' पड्यु छे. आ गच्छना आ० भावरत्नसूरिए सं० १८०० मां अबडरास नव वाड सज्झाय विगेरे रच्या छे. आ उपर थी आ गच्छनु अस्तित्व संवत् १८०० सुधी होवानु तो चोकस जणाय छे (जुओ जैन पर० भा० २ पृ० ३९-४० )

**ग्रंथविषयादि**— दिगंबर अने चैत्यवासीओनी उत्पत्ति बाद थएल उपरोक्त जणावेल नविन प्ररूपणाओ ना प्रतिकार माटे शासनना तत्कालीन प्रयासोना एक भागरूप रचवामां आवेल आ कृतिमां 'पूर्णिमागच्छ'नी एक उत्सूत्रप्ररूपणा—'पक्खी पूनमे करवी' तेनु खंडन अने चतुर्दशीए पक्खी करवी' आ शासनमान्य शुद्ध प्ररूपणानी सिद्धि **महानिशीथ, बृहत्कल्प, निशीथसूत्र** विगेरे अनेक आगमिक ग्रंथोना आधारे करवामां आवेल छे. प्रस्तुतकृति प्राकृतभाषामां रचाएल छे.' ७० गाथात्मक आ कृतिनी शरुआतमां **'षड्-आवश्यक'** नु निदर्शन छे. एनु अपरनाम 'पक्खिअसत्तरी' छे

**रचना:**—जो के मूलकृतिनो रचना समय मूलकार जणावता नथी, परन्तु संवत् ११४९ पछीनी रचना छे. ए तो चोकस जणाय छे

'थोडामां घणु' एम आ कृति गाथासंख्यानी दृष्टिए नानी कही शकाय तेम छे. तेम छतां आमां गुंथाएल जे सित्तेर गाथाओ छे ते गाथाओ सामान्य नहिं परंतु आगमोनी विस्तृत पंक्तिओना हार्दने बहु संक्षेपमां सुंदररीते रजु करे छे. अने एटले आ कृति विद्वानोना मनमां

मान-गौरवनी लागणी प्रेरे तेम छे. आ नानी पण सुंदरकृतिना कर्त्ता पुण्य-नामधेय आचार्य श्री 'मुनिचंद्रसूरि' छे.

**ग्रंथकार:**—ग्रंथकार महर्षि विक्रमनी १२ मी सदीना शासननभोमंडलना अनेक विशिष्ट प्रभावकतारको (ताराओमां) पूर्णिमाना चंद्रनी जेम अद्वितीय स्थान भोगवे छे. पूज्यश्री चांद्रकुलना अने वडगच्छ (तपागच्छ पूर्वेनुं नाम) ना हता.

**जन्मादि:**—पूज्यश्रीए दर्भावती (डभोइ) नगरीने चिंतक अने मोंघीबाई नामना दंपतीने त्यां जन्म लइने पावन करी तेमनुं कुल-चिंतयकुल हतुं तेओए लघुवयमां **'आचार्य यशोभद्रसूरि'** पासे दीक्षा स्वीकारी, तेओना विद्यागुरु **'उपाध्याय विनयचंद्र'** हता. तेओश्रीनुं अपरनाम **'चन्द्रसूरि'** होवानुं जाणवा मले छे. तेओना नामनो एवो अचिंत्य प्रभाव हतो के तेओनुं नाम ज **शांतिकमंत्र** तरीके गणातुं. तेओ बालब्रह्मचारी हता तेओश्री आहारमां १२ वस्तुओ वापरता हता. छ विगय सहित अन्यद्रव्योनो जीवनपर्यंत त्याग कर्यो हतो. निरंतर आयंबिल करता अने सौवीरनुं पाणी वापरता आवा त्यागनी मूर्तिसमा आ महापुरुषना नामोच्चारथी उपद्रवोनी शांति थाय तेमां आश्चर्य शुं ?.

तेओश्रीए प्रमाणदर्शननो अभ्यास **उत्तरज्झयणनी पाइयवृत्तिकार** ते समयना ख्यातनाम विद्वद्वरेण्य **वादीवेताल श्रीशांतिसूरि** पासे कर्यो हतो. **आ० सर्वदेवसूरि** ना वरद-हस्ते सं. ११२९ थी ११३९ ना गालामां आचार्यपदथी विभूषित थया तेओश्रीनी गणना **'सैद्धान्तिक'** मां थती हती. तेओश्रीना परिवारमां ५०० मुनिओ हता. तेमनुं विहारक्षेत्र खंभातथी नागोरपर्यंतनुं हतुं.

तेओश्री संवत् ११७८ कार्तिक वद ५ पाटणमां स्वर्गभाक् थया. आ समये तेमना शिष्य **वादीदेवसूरि** अंबिकादेवीनी सूचनाथी त्यां हाजर थया हता. तेओश्रीए त्रीस नविनग्रंथो रच्या छे.

**वृत्तिकार:**—मूलकारना प्रशिष्य अने **दिगंबर विजेता श्रीवादिदेवसूरिना** शिष्य **आ० महेश्वरसूरिए** आ ग्रंथ उपर **'सुखप्रबोधिनी'** नामनी वृत्ति रची छे. तेमां तेमने मुनि **वज्रसेने** सहाय करी

हती. वृत्तिकार स्वयं वृत्तिने अंते श्री वज्रसेननो उल्लेख करे छे ( जुओ प्रशस्ति श्लोक २)

**रचनाकाल:—**वृत्ति कइ सालमां बनावी तेनो वृत्तिकार स्वयं उल्लेख करता नथी. परंतु वृत्तिमां आवती योगशास्त्र ( मूल ) नी साक्षी ( जुओ पृ० २६ ) उपरथी जणाय छे के.—आनी रचना संवत् १२१८ पछीनी छे,

**उपसंहार:—**जो के वर्त्तमानमां आ 'पूर्णिमागच्छ' ना साधुओ जणाता नथी, तेमज तेमनी प्ररूपणाने माननारो श्रावकवर्ग पण नथी. इतिहासना पाछला पानओमां आ गच्छनी प्ररूपणा विलीन थइ गइ छे. हकीकतमां आ गच्छ ने तेनी मान्यता इतिहासना पाने भूतकाल थइ गइ छे, तो पछी आ मान्यतानुं खंडन करता ग्रंथना प्रकाशननी जरुर शी ! आ प्रश्न सहज सुज्ञ वांचको समक्ष आवी जाय. आनो उत्तर आपता मारे जणाववुं जरुरी छे के—घणीवार प्राचीन इतिहासना भग्नावशेषोने पण शोधवा पडता होय छे. अने ते पण ऐतिहासिक दृष्टिए महत्वनुं होय छे. तो प्राप्त थतो आ कृति ने अप्रकाशित केवी रीते राखी शकाय ! कोइ पण ऐतिहासिक वारसाने नष्ट थवा देवो ए मूर्खामी लेखाय. आ कृति एक महत्वना भूतकालना बनावनी साथे संकलाएल वारसो छे. जेमां ईर्ष्याने वश महान् आचार्य पण शासनना सिद्धांतने फेरववा रूप शुं प्ररूपणा करे ! अने तेनाथी तेमनी पोतानी ज उज्ज्वल कारकीर्दी पर कलंकनो कालिमा छवाइ जाय त्यारे सामान्य मानवीनी विशात शी. विधिनी केवी वक्रता छे ! आवा एक नहिं पण तमाम ग्रंथोना प्रकाशननी जरुर छे. जेथी आपणा भूतकालीनभव्य-वारसाने भूली न शकीए. ए उज्ज्वल परंपराने अनुसरी वर्त्तमानने पण भव्य ने उज़्वल बनावीए.

अंतमां १२ मी सदीना इतिहासने स्पर्शती **'आ० मुनिचंद्रसूरि'** नी आ कृतिना **'परिचय'** मां क्यांय पण क्षति होय तो सुज्ञ विद्वान् वडिलो मने बालक समजी क्षमा करशे एवी अभ्यर्थना साथे विरमुं छुं.

**लि. मुनि पुण्योदयसागर**

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

आगमोद्धारक-आचार्यप्रवर-श्रीआनन्दसागरसूरीश्वरेभ्यो नमः ।

आचार्य-श्रीमुनिचन्द्रसूरिरचिता पाक्षिक-सप्ततयपराभिधाना

# आवश्यक-सप्ततिः

श्रीमते वर्द्धमानाय जिनेन्द्राय जगद्विदे ।
सुरासुरनमस्याय वागीशाय नमो नमः ॥१॥
अनन्यसाधारणशीलसम्पदे त्रिनम्रविद्वज्जनमुद्रितापदे ।
दिगम्बराडम्बरभङ्गसूरये प्रणम्य तस्मै गुरुदेवसूरये ॥२॥
स्वगुरूणामपि श्रीमद्-गुरूणामनघा गिरः ।
सिद्धान्तगर्भसन्दर्भाः क्वचित् किञ्चिद् विवृण्महे ॥३॥

इह किल कलिकालबलप्रबलकुतर्ककर्कशप्रादुर्भवत्कुग्रहग्रहावेश-वशीकृतान्तःकरणाः केचित् तपस्विनः कष्टानुष्ठानेनाऽऽत्मानमायासयन्तः सन्तोऽन्यानपि मुग्धबुद्धीन् व्यामोहयन्ति । ततस्तानेवंविधानवलोक्य अपारकरुणासारसुधारसैकपारावाराः अनेकान्त-जयपताकाचारु-चारीसंचारचतुरनर्त्तकीनर्त्तनसूत्रधाराः दुःषमासमय-समुल्लासितप्रमादपातालतलावमज्जद्भिःकलङ्कानुष्ठाननिष्ठाधरणीसमु-द्धरणादिवराहरूपाः संसारकान्तारान्तःपरिभ्रान्तनितान्तश्रान्तजन्तु-जातसन्तापनिर्वापकसद्देशनामृतकूपाः कर्मप्रकृत्याद्यखिलखिलग्रन्थ-ग्रन्थिभिदुर-स्वशेमुषीविमुखीकृताखर्वगर्वसुपर्वसूरयः पूज्याः श्रीमन्-मुनिचन्द्रसूरयः सूर्या इव मूलोन्मूलिततमःसम्भारेण स्वगोप्रस्तारेण

तेषां सन्मार्गप्रबोधमुत्पादयितु तद्विप्रतार्यमाणाऽन्यजन्तुजातमव-बोधयितुमात्मस्मृतिं विधातु च सिद्धान्तोद्धारसारभूतं प्रमाणनिष्पन्न-नामकमावश्यकसप्तत्याख्यं प्रकरणमारभमाणा: प्रत्यूहव्यूहापोहाय स्वाभिमतं प्रत्यासन्नोपकारित्वाच्चरमं तीर्थाधिपतिं यथार्थाभिधानं श्रीमन्महावीरमभिष्टुवन्त: साक्षादभिधेयप्रयोजनाभिधायिकामिमा-मादावेद गाथां प्राहु:—

देविंदविंदवंदिअ-पयपउमं वंदिउं जिणं वीरं ।
आवस्सयस्सरूवं समासओ किंपि जंपेमि ॥१॥

व्याख्या—देवेन्द्रवृन्दवन्दितपदपद्मं वन्दित्वा जिनं वीरम् आवश्यकस्वरूपं समासत: किमपि जल्पामीति सङ्क्षेपार्थ: ।

व्यासार्थस्त्वयं—देवेन्द्रा:—शक्रादय: चतु:षष्टि: भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकेषु यथाक्रमं विंशति-द्वात्रिंशद्-द्वि-दश-सङ्ख्योपेतत्वात् । तेषां वृन्दानि सूर्याचन्द्रमसामसङ्ख्येयत्वात् । यद्वा-देवाश्च इन्द्राश्चेति देवेन्द्रास्तेषां वृन्दानि तैर्वन्दितम्-अभित: प्रणतं स्तुतं वा 'वदि अभिवादनस्तुत्यो' रितिवचनात्, पदपद्म-चरणारविन्दं यस्य स तथा तं, वीरमिति विशेष्याभिधानं, कर्म-विदारणात्तपसा विराजनात् तपोवीर्ययोगाच्च वीर: पृषोदरादित्वात् सिद्धि: । यथोक्तं—

विदारयति यत्कर्म तपसा च विराजते ।
तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृत: ॥१॥

यद्वा—विशेषेण कर्मणामीरणात् सिद्धिगमनाद्वा वीर: तं, कथम्भूतं ? रागादीनामान्तरशत्रूणां जयाज्जिनं वन्दित्वा प्रशस्तमनो-वाक्कायव्यापारेण प्रह्वीकृत्येत्यर्थ: । किम् ? अवश्यमित्येतस्य 'भावे चौरादित्वादकञ्' आवश्यकम् । अथवाऽवश्यमित्यव्ययं कर्त्तव्य-विशिष्टे नियमे वर्त्तते । अव्ययानामनेकार्थत्वात् । ततश्चावश्यकर्त्तव्य-

भाव आवश्यकमिति गर्भार्थः। तस्यावश्यकस्य स्वरूपम्-असाधारणरूपं किं ? केन ? क्व ? कथं ? कर्त्तव्यमित्येवमागमोक्तरूपं समासतः-सङ्क्षेपेण, सङ्क्षेपेणापि समग्रमसमग्रं वोच्यते ? इत्यत्र: प्राहुः-किमपीति-स्तोकं मूलग्रन्थवत्समस्ततत्स्वरूपानभिधानाज्जलगामि-प्रतिपक्षविक्षेपेण व्यक्तं प्रतिपादयामीत्यर्थः।

अत्र पूर्वार्द्धेनाभिमतदेवतां नमस्कृत्योत्तरार्द्धेनाभिधेयं सप्रयोजनमभिहितम्। तत्राऽऽवश्यकस्वरूपमभिधेयं सङ्क्षेपभणनं प्रयोजनम्। सम्बन्धस्तु प्रस्तुतप्रकरणाभिधेययोरभिधानाभिधेयलक्षणः सामर्थ्यगम्य एव। अत्र च जिनमित्यनेनापायापगमातिशयोऽभिधीयते। आन्तरारिवर्गविजेतर्येव जिनशब्दप्रवृत्तेः। देवेन्द्रवृन्दवन्दितपदपद्ममित्यनेन तु पूजातिशयः। अतिशयद्वयी तु सामर्थ्यगम्या। तथाहि—परमाप्तत्वाद् भगवतः किलात्र स्मरन्ति पूज्याः। आप्तश्च योऽवितथज्ञानेनावलोक्य पदार्थसार्थं यथावस्थितं परेभ्यः प्रतिपादयति स एव व्यपदिश्यते। यथोक्तमस्मद्गुरुभिरनवद्यविद्यावैशारद्यविनिर्जितविबुधसूरिभिः श्रीमद्देवसूरिभिः-'अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञात चाभिधत्ते स आप्त' (प्रमाणनय०) इति। ततश्च भगवतः सम्यगभिधायकत्वाद्वागतिशयः। सम्यग् वचनं च सम्यग्ज्ञानपूर्वकमितिकृत्वा ज्ञानातिशयश्च सामर्थ्याद् गम्यते। इत्यसाधारणातिशयचतुष्टयाभिधानेन स्तुतित्वमत्रोपपन्नमिति ॥१॥

साम्प्रतं 'तत्त्वभेदपर्यायैर्व्याख्या' इतिन्यायात् व्युत्पत्तिगर्भमावश्यकस्वरूपं निरूपयन्तः परमगुरवः प्राहुः-

सामाइअ-चउवीसत्थयाइं जमवस्समेव करणिज्जं।
समणाइणा तमावस्सयं ति सुत्ते जओ भणियं ॥२॥

व्याख्या—समस्य-रागद्वेषरहितस्य सतोऽयनं-गमनं समायः।

स एव तत्र भवं वा, तेन वा निर्वृत्तं तत्प्रयोजनं वा सामायिकम् । यद्वा-सम्यग्ज्ञानादीनामायो-लाभः समायः । शेषं पूर्ववत् । चतुर्विंशतिसङ्ख्यानां तीर्थंकराणां स्तवो यत्र दण्डके स चतुर्विंशतिस्तवः । सामायिकं चतुर्विंशतिस्तवश्चेति समासः । तावादी यस्य वन्दनक-प्रतिक्रमण-कायोत्सर्ग-प्रत्याख्यानरूपचतुष्टयस्य तत्तथादि । एवं च सामायिक-चतुर्विंशतिस्तवादि यदवश्यकर्त्तव्यं तदावश्यकमिति योगः । केनेत्याहुः श्रमणादिना । श्रमणः-सर्वसावद्ययोगविरतः तदादिना । आदिशब्दाभिधेयं स्वयमेव वक्ष्यति-'साहूसु' इत्यादिना । एतच्च न स्वातन्त्र्यादुच्यते किन्तु पारगतोक्तागमपारतन्त्र्यादिति 'सुत्ते'त्ति । सूत्रेऽनुयोगद्वाराख्ये यतो भणितमिति ॥२॥

भणितमेव दर्शयति—

समणेण सावएण य अवस्स कायव्वयं हवइ जम्हा ।
अंतो अहोनिसस्स तम्हा आवस्सयं बेंति (नाम) ॥३॥

व्याख्या--श्राम्यति-तपस्यतीति श्रमणः सन्मनाः सममनाश्च । यथोक्तं—

तो समणो जइ सुमणो भावेण य जइ न होइ पावमणो ।
सयणे य जणे य समो समो य माणावमाणेसु' ॥१॥

तेन, तथा शृणोति सर्वज्ञोक्तं तत्त्वमिति श्रावकः । यदुक्तं—

धम्मोवग्गहदाणाइसंगओ सावओ परो होइ ।
भावेण शुद्धचित्तो निच्चं जिणवयणसवणरई' ॥१॥

तेन च । चशब्दस्यानुक्तसमुच्चयार्थत्वात् साध्वी-श्राविकाभ्यां च । किम् ? अवश्यं-नियमेन अन्तः-मध्ये अह्नो निशायाश्च कर्त्तव्यकं भवति यस्मात् तस्मादावश्यकमिति ब्रुवते ॥३॥

अथावश्यकस्य पूर्वार्द्धेन भेदानुत्तरार्द्धेन तद्भेदाद्यभेदस्य स्वरूपं प्रकटयन्ति—

तं दव्वखित्तकाले भावं च पडुच्च दव्वओ तत्थ ।
साहुसु साहूणीसु य सुस्सावयसाविआसुं य ॥४॥

व्याख्या—तदित्यावश्यकं द्रव्य-क्षेत्र-कालान् भावं च प्रतीत्य-आश्रित्य भवतीति शेषः । अत्र प्राधान्यख्यापनार्थं भावस्य व्यस्त-निर्देशः । तत्र-तेषु चतुर्षु भेदेषु मध्ये द्रव्यतो—द्रव्यरूपतामाश्रित्योक्तरूपेषु साधुषु साध्वीष्वेव सुश्रावकश्राविकास्वेव चकारयोरेव-कारार्थत्वात् । एतदात्मद्रव्याश्रितत्वेन प्रतीयमानत्वाद् द्रव्यावश्यकमिति अथ क्षेत्रावश्यकं निरूपयन्ति—

खित्तंमि गुरुसमीवे सिरिवच्छाकारमंडलीए उ ।
तव्विरहे ठवणाए तस्स च्चिअ जं सुए भणिअं ॥५॥

व्याख्या - क्षेत्रे—सकलसत्त्वनिरपायपवित्रभूभागरूपे साधूनां नियमेनोपाश्रये, श्रावकाणां पुनश्चतुर्षु स्थानेषु पौषधशाला-साधु-वसति-चैत्य-गृहैकदेशरूपेषु कर्त्तव्यम् । यदाह आवश्यकचूर्णिकृत—

'चउसु ठाणेसु नियमा कायव्वं । तं जहा—चेइयघरे वा साहुमूले वा पोसहसालाए वा घरे वा आवस्सय' मिति । यतिभिः स्वोपाश्रयेपि । गुरुसमीपे तत्र गृणाति—प्रतिपादयति यथावस्थितं तत्त्वमिति गुरुः । यदुक्तं—

धर्मज्ञो धर्मकर्त्ता च सदा धर्मपरायणः ।
सत्त्वेभ्यो धर्मशास्त्रार्थ—देशको गुरुरुच्यते' ॥१॥

यद्वा—योगक्षेमकारित्वाद् गुरुः स्वामी । यत उक्तं—

गुणानां पालनं चैव तथा वृद्धिश्च जायते ।
यस्मात्सदैव स गुरु-र्भवकान्तारत्रायकः ॥१॥ इति ।

तस्य—गुरोः समीपे—सन्निधौ, न च तत्रापि विशर्वैरेव कार्य-मित्याहुः-श्रीवत्साकारमण्डल्यामेव, तुशब्दस्यैवकारार्थत्वात् । यदुक्त-मावश्यक-चूर्णिवृत्त्योः—

तत्थ पडिक्कमंताणं इमा ठवणा गुरू पच्छा ठायंतो मज्झेणं गंतुं सट्ठाणे ठयइ। जे वामओ ते अणंतरसव्वेणं गंतुं सठाणे ठायंति। जे दाहिणओ ते अणंतर अवसव्वेणं गंतुं ठायंति' त्ति। त इरहे–ग्लानप्रयोजनादिना अन्यत्र गतानां गुरुविरहे स्थापनायाम्-अक्षकाष्ठादिमय्यां तस्यैव गुरोः सम्बन्धिन्यां कर्त्तव्यमिति शेषः। यत्–यस्मात् श्रुते-विशेषावश्यकाख्ये भणितमिति ॥५॥

भणितमेव दर्शयन्ति—

आवस्सयं पि निच्चं गुरुपायमूलंमि देसिअं होइ।
वीसुं पि य संवसओ कारणओ जदभिसिज्जाए ॥६॥

व्याख्या—'आवस्स०' आस्तां तावदन्यदाऽऽलोचनादिकं किन्तु आवश्यकमपि 'वीसुंपिय'त्ति। विष्वगपि च कारणतः-कारणमाश्रित्य यद्यभिशय्य यां संवसति साधुस्तदा तत्रापि संवसतो व्याघाताभावे सति नित्यं गुरुपादमूले देशितं–सामायिकसूत्रोक्तामन्त्रणार्थभदन्त-शब्देन दर्शितं भवतीति सम्बन्धः। अभिशय्या चात्रोपलक्षणमभि-निषीधिकायाः। अनयोश्च स्वरूपमिदं–हस्तशतबाह्या मूलवसत्यस-म्बद्धा अतिसङ्कीर्णत्वेन कायोत्सर्ग–त्वगवर्तनस्थानरहिता, अभिः-आभिमुख्येन कोलाहलादिव्याघातवर्जिता उपविष्टानामेव स्वाध्याय–भूमिः अभिनिषीधिका। तत्र स्वाध्यायं कृत्वा निशायामेव मूलवसतौ प्रयान्ति। बाह्याऽबाह्या सम्बद्धाऽसम्बद्धा स्वापेपि योग्या स्वाध्याय-भूमिः प्रतिवसतिरभिशय्या। तदुक्तं व्यवहारे–

ठाणं निसीहिय त्ति य एगट्ठं तत्थ ठाणमेवेगं।
चेतेति (वल्लंति) निसि दिवा वा सुत्तत्थ निसीहिया सा उ ॥१॥

सज्झायं काऊणं निसीहियाओ निसिं विय उविंति।
अहिवसिउं जत्थ निसिं उविंति पाउ तई सेज्जा ॥२॥

पाउइति प्रातः, जा सा उ अभिनिसीहिया सा नियमा होइ उ असंबद्धा संबद्धमसंबद्धा अभिसेज्जा होइ नायव्वा ॥३॥'

कानि पुनः कारणानि यान्याश्रित्यानयोर्गन्तव्यम् ? इति चेद्, उच्यते—

'असज्झाइय पाहुणए संसत्ते वुट्ठिकाय सुयरहस्से' इति। तत्र मूलवसतावस्वाध्यायिके जाते सत्यभिनिषीधिकायां बाह्याऽसम्बद्धाभिशय्यायां च गम्यते। हस्तशतबाह्यत्वेनोभयोरपि स्वाध्यायकरणसम्भवात् ॥१॥ तथा प्राघूर्णकागमने सति असङ्कटत्वेन वसतेः परस्परसङ्घट्टादिना ॥२॥ सम्मूर्च्छितप्राणिजाते. संसक्तायां च तदुपमर्दादिना ।३। वृष्टिकायेऽपि आर्द्रवस्त्रपरिभोगादिना ॥४॥ यथाक्रममात्मसयमोभयविराधनाभीरुभिरभिशय्यायां गम्यते। तत्र शयनसम्भवात् ।५। तथा श्रुतं–छेदश्रुतं रहस्यं-विद्यामंत्रादि तस्मिँश्च वसतौ दीयमाने परिणतिरहितानां तच्छ्रवणं स्यात् तच्च तेषां महतेऽनर्थायेत्युभयत्रापि गम्यते। तदुक्तं—'पढमचरिमे दुगं तु सेसेसु होइ अभिसेज्जा' इत्युक्तकारणैरव्याघाते आगत्यैव गुरुसमीपे कार्यम्। तदुक्तं व्यवहारे—

'आवस्सगं तु काऊं निव्वाघाएण होइ गंतव्वं।
वाघाएण उ भयणा देसं सव्वं च काऊणं। ।१॥
आवस्सगं अकाउं निव्वाघाएण होइ आगमणं।
वाघायंमि उ भयणा देसं सव्वं व काऊणं ॥२॥

देशमित्यपरिपूर्णम्। अन्यत्राप्युक्तं–'वीसुंमि वसंताणं दोन्नि वि आवस्सया सह गुरुहिं'ति। गमनागमनव्याघाताश्चैते। तद्यथा—

'तेणा सावयवाला गुम्मिय आरक्खि ठवण पडिणीए।
इत्थिनपुंसक संसत्तवासं चिक्खलकंटे य' ॥१॥

'गुम्मि'त्ति। सेनापतिः। स गच्छति। ठवण त्ति। क्वचिद्राजकृता

व्यवस्था भवति सूर्यास्तमयानन्तरं न चङ्क्रमितव्यमिति। वृद्धास्त्वेवं व्याख्यानयन्ति—आवश्यकमपि नित्यं गुरुक्रममूले दर्शितं आमन्त्रणार्थं भदन्तग्रहणेन दर्शितं भवति विष्वगपि संवसतः। ननु कथं विष्वग् संवासः? कारणतो-निर्व्याघाते सति यत्—यस्मादभिशय्यायां संवासः कल्पादावुक्त इत्यध्याहार इति। यत्तु 'जयइ सेज्जाए' पाठान्तरमपेक्ष्य व्याख्यान्तरम्—आवश्यकमपि नित्यं गुरुपादमूले दर्शितं भवत्यामन्त्रणार्थं भदन्तशब्देन वसतिसङ्कीर्णत्वादिकारणतो विष्वगपि च सवसतो मुनेः। यस्य तु श्वापदभयादेः कारणतो गुरुव्रन्तिके प्रतिकमणार्थमागमनं न सम्भवति सोऽन्यस्यामपि शय्यायां स्थितो गुरुस्थापनादिक्रमेण यतते-यतनां करोतीति। तत्तथाविधपाठान्तरस्य सूत्रादर्शेष्वदर्शनात्। चिरतरवृत्तिकारैस्तस्याऽव्याख्याततत्वात्। प्रस्तुतप्रकरणपरायणैः परमाराध्यैरपि तस्यानभीष्टत्वाच्चानादृतमिति ॥६॥

गुरोः स्थापनायामित्युक्तं, तत्र किं स्वगुरोरन्यस्यापि सा कार्या? नेति निर्दिशन्ति—

**ठवणावि अ निअगुरुणो सुत्ते भंते त्ति जेण गणहारी।**
**आमंतइ तित्थयरं सेसा अप्पप्पणो अ गुरू ॥७॥**

व्याख्या—न केवलं गुरुपार्श्वे एव प्रतिक्रमितव्यं स्थापनापि निजगुरोरेव, एवकारस्यावधारणार्थत्वात् कार्येति शेषः। निजगुरोरेव स्थापनेति कुतो ज्ञातम्? इति चेद्, अत्राहुः—सुत्तेत्ति 'करेमि भंते' इत्यादिसामयिकदण्डकसूत्रे 'भंतेत्ति' भदन्तशब्देन येन कारणेनामन्त्रयति-अभिमुखीकरोति गणधारी—गणभृत् गौतमादिस्तीर्थंकरं श्रीवर्धमानं शेषाः साधव आत्मीयगुरूनामन्त्रयन्तीति। यतो अस्यावश्यकचूर्णिः—'भंतेत्ति गोयमसामी भट्टारयं आमंतेइ। सेसा अप्पप्पणो आयरिए आमंतयंति'त्ति गुरोश्च स्थापना विनयख्यापनार्थं, यदुक्त—

'गुरुविरहम्मि य ठवणा गुरूवएसोवसेवणत्थं च ।
जिणविरहम्मि जिणबिंब-सेवणामंतणं सहलं ॥१॥
रण्णो य परोक्खस्स वि जह सेवा मंतदेवयाए वा ।
तह चेव परोक्खस्स वि गुरुणो सेवा विणयहेउ' ॥७॥ इति ॥

अथ कालावश्यकस्य पूर्वार्द्धेन भेदान् उत्तरार्द्धेन तु तदाद्यभेदं निरूपयन्ति—

काले पुण पंचविहं दिवसनिसापक्खिआइभेएण ।
आरयणिपढमपहराउ देसिअं देसिअं तत्थ ॥८॥

व्याख्या — काले – कालविषयं पुनरावश्यकं - पञ्चविधं–पञ्चप्रकारं भवति । तानेवाहुः–दिवसनिशापाक्षिकादिभेदेनेति आधाराधेययोरभेदोपचाराद् दिवसेन-दिवसातिचारेण निर्वृत्तं दैवसिकमनुष्ठानं, निशया-निशातिचारेण निर्वृत्तं नैशं–रात्रिकम्, आर्षत्वादिकणप्रत्ययलोपात् दिवसनिशाशब्दाभ्यामुक्तमिति मन्तव्यम् । एवं पक्षेण-पक्षातिचारेण निर्वृत्तं पाक्षिकम् आदिशब्दाच्चातुर्मासिक-सांवत्सरिकपरिग्रह इति । तत्र तेषु पञ्चसु भेदेषु मध्ये आरजनि-प्रथमप्रहरान्–निशायाः प्रथमप्रहरमभिव्याप्य दैवसिकं देशितं–कथितमावश्यकचूर्णावित्युत्तरगाथापदेन योगः इति ॥८॥

अथ गाथार्द्धेन रात्रिकं चूर्णावुक्तत्वेन शेषेण पुनरुभयोरपि व्यवहारानुयायितां दर्शयन्ति—

उग्घाडपोरिसिं जा राइयमावस्सयस्स चुन्नीए ।
ववहाराभिप्पाया भणंति पुण जाव पुरिमड्ढं ॥९॥

व्याख्या–उद्घाटपौरुषीं यावद् इति । उद्घाट्यतेऽर्थोऽस्यामित्युद्घाटाऽर्थपौरुषी–द्वितीयः प्रहर इत्यर्थः । न चैतत् स्वमनीषिक-

योच्यते, यतो व्यवहारचूर्णावुक्तं-'अंगं सुयक्खंधं वा पुव्वसूरे' प्रथमप्रहरे । उग्घाडाए वि पोरिसीए अणुन्नविंति निसीह-माईणि'त्ति । पञ्चकल्पचूर्णावप्युक्तं-'सो य पुण सत्थो कालुठाई नाम जो सूरे उइए उठेइ । कालनिवेसी उग्घाडपोरिसीए ठाइत्ति' । तामुद्घाटपौरुषीं मर्यादीकृत्य, न पुनरभिव्याप्त्येति । तथाचावश्यक-चूर्णिः-दिवसओ वंदणगविहाणं भणियं । राइमाईसु वि जेसु ठाणेसु दिवसग्गहणं तत्थ राई भाणिअव्वा । नवरं-'पाउसिए जाव पोरिसिं न उग्घाडइ ताव देवसियं भण्णइ ॥ पुव्वण्हे जाव न उग्घाडइ ताव राईयं'ति । तथा व्यवहार-अशठसमाचरणा तदभिप्रायाः सूरयो भणन्तीति योगः । यद्वा-व्यवहारव्यवहारिणोरभेदाद् व्यवहार-शब्देन व्यवहारिण उच्यन्ते । तेषामभिप्रायं प्रतीत्य प्रमाणीकृत्य पुरिमार्द्धं दिनरात्र्योः पूर्वार्द्धं यावद् भणन्ति पूर्ववृद्धाः । केचित्तु वृद्धा-अविधिकृताद्वरमकृतमित्यसूयावचनमिति वचनार्थमनुसरन्तः सन्तः -

गोसंमि अकयआवस्सयाण पाउसियं समावन्नं ।
पाभाइयपडिक्कमणं काउं इयरं तओ पच्छा' इत्यादि दिशन्ति ॥९॥

अथ पाक्षिकस्वरूपं विप्रतिपत्तिनिरासार्थं प्रपञ्चतः प्राहुः—

**पक्खिअपडिक्कमणं पुण चउद्दसीए तिहीइ कायव्वं ।**
**तं जेण चउत्थेणं भत्तेणेवं सुआएसो ॥१०॥**

व्याख्या-पाक्षिकप्रतिक्रमणं पुनश्चतुर्दश्यामेव तिथौ कर्त्तव्यं, कुतो हेतोः ? इत्याहुः-'तं जेणं' ति । तदिति पाक्षिकं येन कारणेन चतुर्थेन भक्तेनेति एवं वक्ष्यमाणप्रकारेण श्रुतादेशो-निशीथरूपश्रुता-ज्ञेति । तथा पाक्षिकप्रतिक्रमणं चतुर्दश्यामेव कर्त्तव्यमित्यत्र पूज्यो-क्तान्येव हेत्वन्तराणि प्रदर्श्यन्ते । तद्यथा-व्यवहारे पाक्षिकशब्देन चतुर्दश्या एवाभिधानात् ।१। एतच्चाग्रे दर्शयिष्यन्ति 'विज्जाणं परिवाडिं'मि'त्यादिना तथा पक्षाभ्यन्तरे सूत्रे क्वचिदपि ज्ञानपञ्चमी-

परिहारेण पर्वत्रयस्यानुपदेशात् २। 'पंचदसी पाक्षिकमि'ति क्वचिदपि व्याख्यानाऽदर्शनात् ।३। चतुर्दशी-पाक्षिकयोः एकतरग्रहणेऽन्यतरग्रहणाऽदर्शनात् ।४। प्रस्तुतपर्वत्रयाकरणे पृथक् प्रायश्चित्तादर्शनात् ।५। पाक्षिकोक्तानुष्ठानानां चतुर्दश्यामेवोपलम्भात् । ६॥ इति ॥

अमुं चार्थं प्रायः स्वयमेव गाथात्रयोदशकेन पूज्याः प्रकटयाञ्चक्रिरे ।

तथाहि—'पंचाणुट्ठाणमयं पक्खियपव्वं जिणेहिं पण्णत्तं ।
ताइं चउद्दसीए पायं दीसंति नन्नत्थ ॥१॥

अट्ठमी-चउद्दसीसुं उववासो साहुणो सुए भणिओ ।
आवस्सयचुण्णीए चेइयजइवंदणा भणिया ॥२॥

ववहारे पुण भणिया पक्खिअसद्देण चउद्दसी चेव ।
आवस्सयंमि पक्खियदिणंमि पुण पक्खपडिक्कमणं । ३॥

भणिया निसीहमाइसु पक्खियदिवसंमि सुद्धि पच्छित्तो ।
एवं चउद्दसीए पंचाणुट्ठाणभणणंति ॥ ४ ॥

जं पुण लोए रूढकत्थ वि पन्नरसीतिहि-पडिक्कमणं ।
चउमासगपडिक्कमण छट्ठतवेणं सुए भणियं ॥५॥

तं च किल पुन्निमाए तस्सणुसारेण पक्खपडिकमणं ।
मोत्तुं तवाइविसेसं पडिवन्ना सरिसभावाउ ॥६॥

सुयणाणपंचमी अट्ठमी य तह चउद्दसी उ चउमासं ।
संवच्छरियं पव्वा साहुण सया इमे पंच ॥७॥

एवं महानिसीहे भणियं पुव्वेसु तिसु य उववासो ।
चउमासे पुण छट्ठं तदट्ठमो पज्जुसवणंमि ॥८॥

सुयनाणपंचमीए सुयपूया सा य बोहिलाभाय ।
कम्मक्खयट्ठमट्ठमि उववासो चउद्दसीए पुणो ॥९॥

निस्सेससिद्धिलाभो चउमासग-पज्जुसवणगपव्वेसु ।

उत्तरकरणाइफलो तओ विसेसो जओ भणियं ॥१०॥

उत्तरकरणं एगग्गया य आलोयचेइवंदणया ।
मंगलधम्म कहावि य पव्वेसु तवोगुणा हौंति ॥११॥

सुयनाणपंचमीए उववासो नाणपूयण दोन्नि ।
उववासु अट्ठमीए चेइयजइवंदणं तिन्नि ॥१२॥

एए चउद्दसीए तिन्नि तहालोयणा पडिक्कमणं ।
चउमासगवच्छरिएसु पंच एए अणुट्ठाणा ॥१३॥

अमुं च गाथोक्तमनुष्ठानपञ्चकमुत्तरग्रन्थेन क्वचित् किञ्चिद् व्यक्तीकरिष्यन्ति ॥१०॥

श्रुतादेशमेव दर्शयन्ति—

अट्ठम-छट्ठ-चउत्थं संवच्छर-चाउमास-पक्खेसु ।
न करेइ सायबहुल-त्तणेण जो तस्स पच्छित्तं ॥११॥

व्याख्या—अष्टानां भक्तानां परिहारेण निर्वृत्तं यत्तदष्टमम्-उपवासत्रयम् उत्तरपारणक-पारणकयोरेकभक्तकरणात् । एवं षष्ठचतुर्थयोरपि वाच्यम् । अत्र द्वन्द्वसमासादेकवद्भाव: । तदष्टमषष्ठ-चतुर्थं, 'संवत्सर' त्ति । प्राकृतत्वात् सांवत्सरिकचतुर्मासपाक्षिकेषु न करोति सातबहुलत्वेन-सुखलम्पटत्वेन यस्तस्य प्रायश्चित्तं यथासङ्ख्येन चतुर्गुरु-चतुर्लघुमासगुरुरूपं भवति । एतत् स्वरूपं च गुरुमुखात् ज्ञातव्यम् । यत्र कृतं तदेव वा तप: प्रायश्चित्तं भवतीति । तस्मात् सांवत्सरादिषु यथाभिहितमष्टमादि तप: कार्यमित्यत: पाक्षिके चतुर्थं कर्त्तव्यतया सम्पन्नम् ॥११॥

तच्चतुर्थं चतुर्दश्यामेव बहुषु ग्रन्थेषु निरूपितमिति दर्शयन्त: प्राहु:

तं पक्खिअचुण्णीए महानिसीहे दसासुअक्खंधे ।
भणिअं चउद्दसीए समराइच्चे य फुडमेयं ॥१२॥

व्याख्या—तदिति चतुर्थं पाक्षिकचूर्णौ महानिशीथे दशाश्रुतस्कन्ध इति दशाश्रुतस्कन्धचूर्णौ भणितम्—उक्तं चतुर्दश्यामेव समरादित्ये च स्फुटमेवेति । अथ क्रमेणैषामालापकाः प्रदर्श्यन्ते । तद्यथा—'इच्छामि खमासमणो पियं च मे जं भे हट्ठाणमि'त्यादिपाक्षिकक्षामणकसूत्रोक्तपौषधशब्दव्याख्यायां 'पोसहो अट्ठमि—चउद्दसीसु उववासकरण'मिति पाक्षिकचूर्णिः । 'अट्ठमि—चउद्दसि — नाणपंचमि संवच्छर—चाउम्मासेसु चउत्थ अट्ठम—छट्ठे न करेति तो पच्छित्तं', इति महानिशीथसूत्रम् । तथा—तेणं कालेणं तेणं समएणं वाणियग्गामे नामं नयरे होत्था । एत्थ नगरवण्णओ भाणियव्वो । तस्स य वाणियग्गामस्स नयरस्स बहिया उत्तरपुरच्छिमे दिसीभाए दूई-पलासे नामं चेइए होत्था । चेइयवण्णओ । जियसत्तुराया धारिणी-देवी । एवं समोसरणं भाणियव्वं, जाव पुढविसिलावट्टओ, सामी समोसरिओ, परिसा आगया । धम्मो कहिओ । जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया । अज्जो त्ति समणे भगवं महावीरे बहवे निग्गंथा य निग्गंथीओ य आमंतित्ता एवं वयासी—इह खलु अज्जो समणाणं निग्गंथाण वा निग्गंथीण वा इरियासमिइयाण जाव कायगुत्ताणं गुत्तिंदियाणं गुत्तबंभयारीण आयट्ठीणं आयहियाणं आयजोगीणं आयपरक्कमाणं पक्खियपोसहिए सुयसमाहिपत्ताणं झियायमाणाणं इमाइं दस चित्तसमाहिठाणाइ असमुप्पण्ण पुव्वाइं समुप्पज्जेज्जा' इत्यादि । 'गुत्तबंभयारीणं'ति न केवलं इंदिएसु गुत्ता सेसेसुवि पाणवहाइसु गुत्ता । अट्ठारससु वा सीलंगसहस्सेसु ठिया गुत्तबंभयारी भवंति । 'आयट्ठीणं' ति । आत्मार्थी आयतार्थी वा । 'आयहियाणं' ति आत्मनि हिता हिंसादि-निवृत्त्या । 'आयजोगीणं'ति जस्स जोगा वसे वट्टंते आप्ता वा

यस्य योगा: । 'आयपरक्कमाणं' ति । आत्मार्थं पराक्रमंते न परार्थं परवशा वा चौरबालवत् । पक्खियं पक्खिअमेव, पक्खिए पोसहो पक्खियपोसहो च इसि अट्ठमीसु वा । 'समाहिपत्ताणं' ति । नाणदंसणचरित्तसमाहिपत्ताणं । 'झियायमाणाणं' ति । झाणे वट्टमाणे । धर्मचिन्ता-सर्वे कुसमया अशोभना अनिर्वाहकाः सर्वेषु शोभनतरोऽयं धर्मो जिनप्रणीत: इति ॥१॥ सञ्ज्ञिज्ञानं वा पूर्वभवेऽमुकोऽहमासमिति सुदर्शनादिवत् ॥२॥ स्वप्नदर्शनं वा यथा भगवत: श्री वर्धमानस्वामिन: ॥३॥ तपोमाहात्म्याक्षिप्तदेवदर्शनं वा मथुराक्षपकवत् ।४। अवधिज्ञानं वा ।५। अवधिदर्शनं वा ।६। मन:पर्यायज्ञानं वा ।७। केवलज्ञानं वा ।८। केवलदर्शनं वा ॥९॥ केवलिमरणं वा ॥ १० ॥ सर्वदु:खप्रहाणायेति दश चित्तसमाधिस्थानानि । इति पञ्चमदशासूत्र चूर्णिश्च । अत्र च 'पक्खियं पक्खियमेवे'त्यादिवाक्ये केचित् पाक्षिकं पर्व चतुर्दश्या: पृथगेव व्यवस्थापयन्ति । तत्र किल पञ्चदशीति । न चैतदुपपन्नमाभासते । चउद्दसि–अट्ठमीसु य इति समुच्चयनिर्देशप्रसङ्गात् । न चात्रत्यो वाशब्द एव समुच्चयार्थ: स्यादिति शङ्कनीयं– ''पोसहो अट्ठमि–चउद्दसीसु उववासकरणमि'-त्यत्र पाक्षिकचूर्णौ पाक्षिकक्षामणकोक्तपोषधशब्द व्याख्यायां पाक्षिकप्रक्रमेऽपि पञ्चदश्यामुपवासानभिधानात् । तस्मात् प्रथमवाक्येन पाक्षिकशब्दवाच्यं रूढ चतुर्दशीपर्व गृहीतं व्यवहारे पाक्षिकशब्देन चतुर्दश्या एव ग्रहणात् । द्वितीयविकल्पनिर्देशन तु पक्षे भवमिति व्युत्पत्तिबलात् शब्दार्थप्राधान्यात् पाक्षिकपौषधतयाष्टमीचतुर्दश्या-वुक्ते इति । यद्येवं श्रुतपञ्चम्यपि किं नोक्ता ? इति चेन्, न, उभय-पक्षाव्यापकत्वादिति अत्र 'पौषध' इत्युपवासकरणं चतुर्दश्यामेवोक्त-मिति ॥ तथा—

'गुणसेन अग्गिसम्मा सीहा-णंदा य तह पिया-पुत्ता ।
सिहिजालिणि माइसुया धण-धणसिरिमो य पइभज्जा' ॥१॥

इत्यादि मूलगाथोक्तप्रकारेण गुणसेनजीवः किल मनुष्यभवापेक्ष-या तृतीयभवे जम्बूद्वीपापरविदेहे कोशपुरेऽग्निशर्मा तापसजीवः जालिनीब्राह्मणीपुत्रत्वेन शिखिकुमार इति नाम्ना सञ्जज्ञे । स च तदीयपूर्ववैरानुबन्धप्रवर्त्तितानुचितप्रवृत्तिदर्शनेनोत्पन्नभविष्णद्भाग्य-वैराग्यः सद्ब्रह्मब्रह्मदत्ताभिधानजनकप्रवर्त्तितप्रव्रज्यामहोत्सवः श्रीमद्-जितदेवतीर्थकृद्विजयधर्मगणभृदाचार्यविजयसिंहपादमूले प्रतिपन्न-प्रव्रज्यस्तेनैव सार्द्धं मासकल्पविधिना ग्रामानुग्रामं विहरमाणः स्व-जननीकृत्रिमाह्व नानुरोधवशान्निजगुरुभिस्तद्वन्दापनार्थमनुज्ञातसत्कृति-च्चिचारुसमाचार-यतिपरिवारपरिचर्यमाणचरणः स्वविभवोपहसित-वित्तेशकोशकोशपुरमाजगाम । तत्र चातिशयोपेतवचनरचनचातुर्य-वर्याक्षेपकव्याख्यानवशवशीकृत-श्रीमदजितसेनमहाराजप्रमुखराजन्य-चक्रः समानन्दितसच्चक्रः । पतिवियोगयोगिनीं निःसीमदुःखकालुष्य-वशेन भोगिनीं त्रिकटकूटकपटघटनामात्रशालिनीमपि जालिनीं निज-मातरं विनिर्जितसुधासारानेकप्रकारसद्धर्मप्रवर्त्तकदेशनाभिः सम्बोध-यन् कतिचिद्दिनानि गमयामास । सा च तन्माता तद्विनाशनोपायान-न्वेषयन्ती तदलाभादतीवसंतापदहनदन्दह्यमानमानसा समतिक्रमयामास कञ्चिदनेहसम् इत्यनेन सम्बन्धेन समरादित्ये इदमभ्यधायि-अन्नया आगया चउद्दसी, ठिया साहुणो उववासेण भिक्खा अहिंडणेण मुणिया य तीए, तओ चिंतिउ पयत्ता - जइ कहिंचि कल्लं न एस वावाइज्जइ तओ गमिस्सइ पक्खसंधीए, न एत्थ अन्नो कोइ उवाओ ता करेऊग-का (क)सारं तालपुडसंजुयं चेग मोयगं गोसे उवणेमि एयाण निब्बंधओ य भुंजाविस्सामि एए ' इत्यादि तावद्यावत् गृहस्थानीतपिंडदोष-भणनेऽप्यप्रतिबुद्धायाः तस्याः तद्भावप्रतिपातरक्षणार्थं कुमारेण प्रतिपन्ने भोजने जाव आगया पारणगवेला । कुमारवयणबहुमाणओ उवविट्ठा साहुणो दिन्नाणि य तीए जहोचिएण विहिणा भोयणभायणाणि । परिविट्ठो य सुसंभिओ का (कं) सारो पभुत्ता य साहुणो । दिन्नो य

भुत्तसेस का (कं) सारसंगओ चेव कुमारस्स ताल उडलड्डुगो भुत्तो य तेणमिति । अत: परं कथासम्बन्धयोजनार्थं किञ्चिदुच्यते-यथा विषमविषछटाविह्वलीभूतं चात्मानमवलोक्य शिखिकुमारमुनि: प्रवर्द्धमान-शुद्धाध्यवसाय: कृतानशनप्रतिपत्ति-रूपानुत्तराऽध्यवसाय:, समनुष्ठिततत्कालोचितमिथ्य दु:कृताद्यनुष्ठान-विशेषविशोषितकलुषकषायश्चिन्तयामास-आ: ! किमिदमसारसंसार दुर्विलसित यदेवंविधसद्धर्म-कर्मप्रवर्त्तनचिन्तावसरेऽत्यकाण्डकूष्मा-ण्डनिपतनमिव कृतान्त-कोदण्डदण्डप्रपतनं, दुर्वारप्रसरो हि मोह महाराज: प्रतिसमयमनेकाभिमनोरथपथप्रत्यर्थिनीभिभङ्गीभिरुज्ज-म्भते । तथाहि-दु:प्रतिकारां मातरमुपकरिष्यामीत्यागत:, परमपरम परिणामकारणतया तदपकाराय संवृत्तोऽस्मि । तथाऽस्या:पतिवियोग शोकशङ्कुमुद्धरिष्यामीति स च द्विगुणीकृत: स्ववियोगेन, संसारपङ्का-च्चैतामुद्धरिष्यामीत्यथवैवमकालोपस्थितानर्थप्रथया द्विगुणतमं क्षिप्ता दुर्यश:पङ्के । न लोका: कलयिष्यन्ति मातुरपत्यवत्सलत्वं किन्त्वन्यथा मुग्धबुद्धितया सम्भावयिष्यन्ति । तदहो ! विचित्र: कर्मपरिणाम' इत्यादि परिभावयन् विमुक्तनमस्कारसारविग्रह: प्राप ब्रह्मदेवलोकमिति । तदत्रापि चतुर्थं च चतुर्दश्यामेवोक्तमिति ।

अत्र केचित्-'जइ गेहं पइदियहंपि सोहियं तहवि पक्खसंधीसु । सोहिज्जइ सविसेसं एवं इहयंपि नायव्व' मित्यागमं स्वच्छन्दतया व्याख्यानयन्त:-'कल्लं पक्खसंधीए विहरिस्संति' इति ज्ञापकात् पञ्च-दशीमेव पक्षसन्धिशब्दवाच्यतया व्यवस्थापयन्ति । तत् सर्वथा सत्पथ-प्रत्यर्थिनां प्रलापमात्रं, यतो न पक्षसन्धिशब्दवाच्या पञ्चदश्येव, चतुर्दशीपञ्चदश्योरुभयोरपि तत्शब्दाभिधेयत्वेन लोके प्रसिद्धत्वात् । तथाहि-अबलाबालगोपालका अपि प्रलपन्ति—'चउद्दसिअमावास पक्खसंधी समुद्दो कहं देसंतरं गमिस्ससि?' त्ति । तत: साधारणप्रयोगे सत्यपि यद्यत्र सम्भवति तत् तत्र ग्राह्यम् । यथा पक्षान्ते चन्द्र: क्षीयते

वर्द्धते चे'त्युक्तावपि यथासम्भवममावास्यापूर्णिमयोर्ग्रहः । तद्वदत्रापि 'पक्खसंधीए विहरिस्सती' त्यत्र पञ्चदशी सम्भवति । प्रतिक्रमण-गाथायां तु पक्षसन्धिध्वनिना चतुर्दश्येव ग्राह्या, तत्रैवोपवासाद्यनुष्ठा-नानामुपलम्भात् । पञ्चदश्यास्तु तद्वाच्यत्वस्यतदालापकोक्तपारणके-नैव बाधितत्वात् । यद्यस्यां पक्षसन्धिशब्दवाच्यत्वं तद्द्वारकं च पाक्षिकं स्यात् कथं पारणकमुक्तम् ? इति । ततो व्यवहाराद्यविसंवादेन पक्षपर्व व्यवस्थापनीयमिति । यच्चान्यच्चन्द्रप्रज्ञप्ति-सूर्यप्रज्ञप्ति-ज्योतिःकरण्डादि-ग्रन्थवचनात् 'एगमेगस्स णं पक्खस्स पन्नरस नामधिज्जा पन्नत्ता' इत्यादिरूपात् 'पक्षोऽर्द्धमास' इत्युक्तं तत्सम्प्रतिपन्नमेव मासादिप्ररू-पणापेक्षया, पर्वप्रक्रमे तु तपःप्रभृतेः तत्राभणनादित्यादिबाधकमुक्त-मिति । इत्यादिग्रन्थेषु चतुर्दश्यां चतुर्थमुक्तम् ॥१२॥

पाक्षिकं पर्व चतुर्थेनैव कार्यमिति व्यपदिशन्ति—

संवच्छरियं जह अट्ठमेण चउमासिअं च छट्ठेण ।
तह पक्खिअं चउत्थेण निव्विआरं सुआएसो ॥१३॥

व्याख्या—सांवत्सरिकं यथाऽष्टमेन, चातुर्मासिकं च षष्ठेन तथा पाक्षिकं चतुर्थेनेति निर्विचार श्रुतस्य-निशीथादेरादेशस्तच्च चतुर्दश्या-मेवोक्तमुक्तन्यायेन, पञ्चदश्यां तु यतिपर्वत्वेन चतुर्थकरण कुत्रचिन्नो-पलभ्यते । प्रत्युत तस्यां समरादित्यालापके पारणस्यैवोपलम्भ इति ।१३

अथ चतुर्दश्यां पर्वकृत्यमुपवासमुपदर्श्य चैत्ययतिवन्दनमुप-दर्शयन्ति—

संवच्छरिअं चउमासिअं च सुत्तम्मि जह विणिदिट्ठं ।
चेइयजईण सव्वेसि वंदणे पक्खिअं पि तहा ॥१४॥

व्याख्या—सांवत्सरिकं चातुर्मासिकं च सूत्रे यथा विनिर्दिष्टं सर्वचैत्ययतिवन्दने कर्त्तव्ये, पाक्षिकमपि तथैव 'अवंदणे चेइसाहूण'

मिति भाष्यं 'पक्खिए अभत्तट्ठ' न करेइ सव्वसाहू चेइयाणि य न वंदइ तो पच्छित्त' मिति व्याख्यानयता व्यवहारचूर्णिकृता विनिर्दिष्टमिति योगः। न चैतदनुपपन्नं। यतो-अत्र प्रयोगोऽपि पाक्षिकं चैत्ययतिवन्दनपूर्वकमेव कर्त्तव्यं पूर्वदिनातिचारविशोधकत्वढपर्वत्वाच्चतुर्मासकवदित्यतोऽपि चैत्ययतिवन्दनं पाक्षिके कर्त्तव्यमिति सिद्धम्। तच्चान्यग्रन्थेष्वमावास्यापूर्णिमयोर्न संवदति।

चतुर्दश्यां तु संवादं दर्शयन्ति—

आवस्सयचुण्णीए सव्वाणि वि चेइयाणि साहू अ।
अट्ठमिचउद्दसीसु जं भणिअं वंदिअव्व त्ति ॥१५॥

व्याख्या—'अट्ठमिचउद्दसीसु अरंहता साहूणो य वंदियव्वा' इत्यालापकेनावश्यकचूर्णौ भणितमिति योगः। सर्वाण्यपि चैत्यानि साधवश्चाष्टमीचतुर्दश्योर्यद्-यस्माद्वन्दितव्या इति। तथा सत्यनुष्ठानत्रयस्य साक्षाच्चतुर्दश्यामेवागमे भणनादालोचनायाश्चामावास्यायां प्रतिषिद्धत्वेन वक्ष्यमाणत्वादनुष्ठानचतुष्टयं चतुर्दश्यधिकरणं सिद्धं भवति। ततः पाक्षिकप्रतिक्रमणं साक्षादनुष्ठानसामर्थ्यादायाति।१५।

अमुमेवार्थं सङ्कलय्य निरूपयन्ति—

चेइयजइवंदणतवदिणंमि पडिकमणमत्थओ एइ।
न य पुण सुत्ते दीसइ जह पंचदसीइ पडिकमणं ॥१६॥

व्याख्या-चैत्ययतिवन्दनतपोदिने प्रतिक्रमणं पाक्षिकप्रतिक्रमणमर्थतः-सामर्थ्यादेति। सामर्थ्यादपि न स्याद् यदि साक्षात्पञ्चदश्यां प्रतिक्रमणाभिधानं स्यादित्याहुः-'न य पुण' त्ति। न च नैव पुनर्दृश्यते सूत्रे क्वचिदपि स्थाने यथा पञ्चदश्यां पाक्षिकं प्रतिक्रमणमिति। आस्तां पञ्चदश्यामागमे तत्प्रतिक्रमणाभणनं किन्तु तत्सहचरानुष्ठानभणनमपि नास्ति यतीनामिति गर्भार्थः।

यच्चात्र केचिद् 'मुणियसमयसब्भावा'-इत्याक्रोशपुरस्सरमागमग्रन्थानामभिधानाभिधानमात्रेण मुग्धव्यामोहनाय विरोधमारोपयन्तः प्रतिपादयन्ति-'जइ चेइयसाहुवंदणतवा उ पक्खिअं चउद्दसीए आणिज्जइ तओ अन्नो कोइ अट्ठमीए पंचमीए वा भणिस्सइ' इत्यादि। तदतीव-व्यामोह-व्याकुलितचेतसां तेषां प्रलपितम्। अष्टम्यां पाक्षिक-प्रतिक्रमणसहचरालोचनायाः प्रतिषिद्धत्वात्। पञ्चम्याः पुनरुभयपक्षाव्यापकत्वादन्यतिथीनां तु रूढपर्वत्वाभावात्। यच्च चतुर्दश्यां पाक्षिके क्रियमाणे चातुर्मासिके ऽष्टमम्-उस्सग्गेण पुणासाढसुद्धदसमीए ठियाणमासाढपुन्निमाए चेव पज्जोसवेअव्वमिति वचनाद्-उत्कृष्टपर्युषणायां चाषाढपूर्णमासीदिने क्रियमाणायां चतुर्दशमं प्रसञ्जयन्ति। तदप्यागमरहस्यानभिज्ञप्रलपितम्। चतुर्मासकसम्बन्धिचतुर्दश्यास्तद्भिन्नपर्वत्वेनाराधनाश्रवणादिति। पर्युषणा त्वाषाढपूर्णिमायां नियमग्रहणमात्रं गृहस्थज्ञातीकरणं च। न पुनस्तपः प्रतिक्रमणकरण। तस्य भाद्रपद-सितपञ्चम्यां शाश्वतपर्वण्येवाभिधानादिति ॥१६॥

सम्प्रति पर्युषणाकल्पाकर्षणानुसारेण गाथाद्वयेन प्रस्तुतेऽभ्युच्चयमाहुः—

पाओसियकालेणं अणागएसु व चउसु दिवसेसु।
पज्जोसवणाकप्पम्मि कड्ढिए सव्वसाहूणं ॥१७॥

कज्जइ पज्जोसवणा निसीहमाईसु जं फुडं भणियं।
तं कह पंचदसीए जुज्जेज्जा पक्खपडिक्कमणे? ॥१८॥

व्याख्या—प्रादोषिककालेनाऽनागतेष्वेव चतुर्षु दिवसेषु पर्युषणाकल्पे कर्षिते सति सर्वसाधूनां किमित्याह—क्रियते पर्युषणेति पर्युषणाविधिरतः परमिदं कल्प्यमिदमकल्प्यमित्येवं रूपो विधीयते इति यन्निशीथे कल्पादिषु च स्फुटं भणितं तत्कथं पञ्चदश्यां पाक्षिक-प्रतिक्रमणे क्रियमाणे युज्येत?, पञ्चदश्यां पाक्षिके अनध्यायसम्भवेन

तत्र कालग्रहणात्, चतुर्थीपर्युषणापेक्षया प्रतिपदादिनत्रयस्यैवानागतस्य सम्भवात् इति भावः। कथं तत्र स्फुट भणितम् इत्युच्यते। 'अप्पणो उवस्सए पाओसिए आवस्सए कए कालं घेत्तुं काले सुद्धे असुद्धे वा पट्ठवित्ता कड्ढिज्जइ'। एवं 'चउसु राईसु पज्जोसवण-राईए पुण कड्ढिए सव्वे साहवो समप्पावणिअं काउस्सग्गं करेंति। पज्जोसवणकप्पस्स समप्पावणियं करेमि काउस्सग्गं। जं खंडियं जं विराहियं जं न पडिपूरियं सव्वो दंडओ कड्ढियव्वो जाव वोसिरामि' त्ति। लोगस्सुज्जोयगरं चिंतिऊण उस्सारेत्ता पुणो लोगस्सुज्जोयकरं कड्ढित्ता सव्वे साहवो निसीयंति। जेण कड्ढिओ सो ताहे कालस्स पडिक्कमइ ताहे वरिसाकाल-ठवणा ठविज्जइत्ति॥

अथ मूलपर्युषणापेक्षया पूर्वोक्तमपि घटत इति परावकाशमाशङ्कमानाः प्राहुः—

पंचमिपज्जोसवणे पंचदसीए वि पक्खपडिक्कमणे।
अह अज्जकालगाओ परओ जुज्जेज्ज एयं पि ॥१६॥

व्याख्या—पञ्चम्यां पर्युषणं यत्तस्मिन् क्रियमाणे सति पञ्चदश्यामपि पक्षप्रतिक्रमणे भगवदार्यकालिकात् परतो युज्यतेति तत्कालापेक्षया युक्तमासीदेतन्निशीथाद्युक्तमपीति पराभिप्रायः॥१६॥

अथ पञ्चदश्यां पाक्षिकप्रतिक्रमणाभ्युपगमवादेनापि परोक्तमुल्लण्ठयतः समाधानयन्ति—

एवं पि पज्जुसवणा चउत्थिदिवसंमि तेण विहिय त्ति।
पत्ता जहा पमाणं किं नो तह पक्खपडिक्कमणं? ॥२०॥

व्याख्या—पञ्चदश्यां तत्परतोऽपि पाक्षिकं सिद्धान्तानुक्तत्वादसम्मतमेव परमभ्युपगम्यापि ब्रूमहे। एवमपि पञ्चम्यां पर्युषणे अभ्युपगमवादेन पञ्चदश्यां पक्षप्रतिक्रमणे च सति पर्युषणाचतुर्थी

दिवसे तेन भगवता कालिकाचार्येण विहितेति कृत्वा यथा प्रमाणप्रमितिं प्राप्नोति निर्विवादतया सम्मता, किं न तथा पक्षप्रतिक्रमणं चतुर्दश्यां ? । तत्प्राप्तं उभयोस्तन्निरूपितत्वेन समानेऽपि मात्सर्यचर्यानिबन्धनः पक्षपात एकत्रान्यत्र विद्वेषः ।।२०।।

अथाभ्युपगमापेक्षया तन्निरूपितत्वमेव चतुर्दश्याः समर्थयन्ति—

नूणं चउद्दसीए तमासि तस्सन्नहा कह घडेज्जा ? ।
पज्जोसवणाकप्पस्स कहणं दिणचउक्केणं ।।२१।।

व्याख्या-नूनं-निश्चितं स्वयं प्ररूपितचतुर्थी सांवत्सरिकपर्वं वर्षादनन्तरं चतुर्दश्यां तदिति पाक्षिकं तस्य श्रीकालिकाचार्यस्यासीदिति योगः । कथमन्यथा पर्युषणाकल्पस्य कर्षणमनागतदिनचतुष्केन तस्य भगवतो घटते ? । तस्मात्तस्य पर्युषणाकल्पकर्षणान्यथानुपपत्त्या तेनैव चतुर्दश्यां तत्प्ररूपितमिति मन्तव्यमिति । यच्चात्र कैश्चिदुच्यते—'नेदं भगवता चतुर्दश्यां प्ररूपितं किन्तु तद्गुणेर्ष्यालुनाऽन्येन केनचिदि'त्यादि । तदप्यनौचित्यव्याहृतं, यतो यदि मत्सरिणा शठेनाचरितं स्यादिदं कथं सर्वसम्मतं स्यात् ? । तथाहि—नेदं शठप्ररूपितं समस्ताचार्यपरम्परासम्मतत्वात् यत्तु नैवं न तदेवं यथा भवत्प्ररूपितं श्राद्धप्रतिष्ठादि । तस्मात्पूर्वोक्तयुक्तेर्ज्ञायते भगवतैव प्ररूपितम् । अन्येन वा तत्तुल्यगुणेन सर्वसम्मतेनेति मिथ्यैव तत्र विद्वेष इति ।।

अथ चतुर्मासिकानुसारिणीं पराऽऽशङ्कामुत्थापयन्ति—

चउमासगपडिक्कमणं सुत्ते अह पुण्णिमाइ निद्दिट्ठं ।
तो तयणुसारओ पक्खिअंपि जुज्जेज्ज पक्खंते ।।२२।।

व्याख्या—चतुर्मासिकप्रतिक्रमणं सूत्रे पूर्णिमायां यतो निर्दिष्टं ततस्तद्वदेव पाक्षिकप्रतिक्रमणमपि पञ्चदश्यामेव युक्तं स्यादिति पराभिप्रायः । चतुर्मासकप्ररूपणासूत्रं त्विदं-'कत्तियपुण्णिमाए

चाउम्मासियं पडिक्कंता मग्गसिरबहुलपडिवयाए निग्गंतव्व' मिति निशीथचूर्णि:। कल्पेपीयमेव। एवं शेषचतुर्मासकान्यपि पूर्णिमायां 'पौर्णमासीषु च तिसृषु चतुर्मासकतिथिषु' इति सूत्रकृताङ्गवृत्ति—वचनादिति ॥२२॥

अत्रानुत्तरमुत्तरं वितरन्ति—

**छट्ठेण चउम्मासगमओ य तं पुण्णिमाइवि घडिज्जा।**
**एयं पुणोववासेण वन्निउ चउद्दसीए सो ॥२३॥**

व्याख्या—षष्ठतपसा निशीथादिषु चतुर्मासकं वर्णितमतश्चतुर्दशी-पूर्णिमयोरुभयोरुपवाससम्भवात् तच्चतुर्मासकं पूर्णिमायामपि घटते। एतत्पाक्षिकं पुनरुपवासेन वर्णितं-प्ररूपितं। स चोपवासश्चतुर्दश्यामेव वर्णित: पाक्षिकचूर्ण्यादिषु। ततोऽस्यामेव तद्युक्तमिति ॥२३॥

अत्रैवाभ्युच्चयमाहु:—

**चउमासगाणुसारा जइ पंचदसीइ पक्खपडिक्कमणं।**
**ता कह न पंचमीए संवच्छरिआणुसारेणं? ॥२४॥**

व्याख्या—चतुर्मासकानुसारेण यदि पञ्चदश्यां पक्षप्रतिक्रमणं क्रियते, तत: कथं सांवत्सरिकानुसारेण पञ्चम्यां पाक्षिकं न स्यादिति। यत्त्वत्र केचित् 'कत्तियचाउम्मासियपडिवयाए निग्गंतव्वं। अह वासं न ओरमइ तो मग्गसिरे जद्दिवसे पक्कमट्टियं जायं तद्दिवसं चेव निग्गतव्वं, उक्कोसेणं तिन्नि दसराया न निग्गच्छेज्जा, मग्गसिरपुण्णमाए एत्तियं होइ एय वयणाओ नज्जइ जं पुण्णिमाए मासकप्पं काऊण पडिक्कमित्तु पडिवयाए अण्णत्थ विहरंति' इति वदन्ति। तत् कुबोध-कश्मलधियां विस्फूर्जितम्। यतो मार्गशीर्षपौर्णमासीत्यादिवचनेन मासकल्प एव नियम्यते, न पुन: पक्षप्रतिक्रमणं तस्यां व्यवस्थाप्यते। तत: चतुर्दश्यां तत्प्रतिक्रमणं, पौर्णमास्यां पारणकं च कृत्वा प्रति-

पद्यन्यत्र विहरन्तीत्येतदेव सहृदयहृदयसंवेद्यमिति। न च चतुर्मासकवन्मासकल्पेऽपि पौर्णमास्यां तपः प्रतिक्रमणं च कृत्वा प्रतिपद्येवान्यत्र विहृत्य पारणकं करिष्यन्तीति वाच्यम्। पाक्षिकप्रतिक्रमणानन्तरमन्यत्र विहृत्य प्रतिपदि पारणकस्य क्वचिदप्यागमेऽनुपलम्भात्, पौर्णमास्यां पारणकस्य विहारस्य च 'कल्लं पक्खसंधीए विहरिस्संती' त्यादौ समरादित्यालापके स्पष्टं निर्दिष्टत्वाच्च। तस्माद् भ्रान्तिरियं यदुत-चतुर्मासकल्पाभिप्रायात् पाक्षिकप्रतिक्रमणप्रतिष्ठेति।

अथ दूषणान्तरं गाथाद्वयेन प्रस्तावयन्ति—

तह पज्जुसवणा-अट्ठम-उत्तरपारणगमित्तभणणाउ।
भद्दवयसेय-पडिवयदिवसंमि निसीहचुन्नीए ॥२५॥
नज्जइ पक्खुववासो पंचदसीए न अत्थि साहूणं।
कहमन्नहा घडेज्जा तहिअं तम्मित्तनिद्देसो ? ॥२६॥

व्याख्या—तथेति दूषणान्तरोपक्रमे। भाद्रपदश्वेतप्रतिपद्दिवसे निशीथचूर्णौ पर्युषणाऽष्टमोत्तरपारणकमात्रभणनात् ज्ञायते पञ्चदश्यां पक्षोपवासो नास्ति साधूनाम्। विपर्यये बाधकमाहुः—'कहमन्नह' त्ति। कथमन्यथा घटेत तस्यां प्रतिपदि तन्मात्रनिर्देशः—उत्तरपारणकमात्रभणनं। युष्मदभिप्रायेण हि पञ्चदश्यां पाक्षिकोपवासे सति पारणकस्यापि सम्भवात् तद्भणनमिति स्यात् तस्यां, न त्वेकस्यैव भणनमिति। तथा च निशीथचूर्णिः—रन्ना अंतेउरिया भणिया तुब्भे अमावसाए उववासं काउं सव्वहज्जभुंज्जविहीहिं साहुत्तरवारणए पडिलाहित्ता पारेह पज्जोसवणाए अट्ठमंति काउं पडिवयाए उत्तरवारणयं भवइ। तं च लोगस्स कहियं। तओ पभिइ मरहट्ठविसए समणपूयओ नाम छणो पवत्तोत्ति। यत्रत्रामावास्यायामन्तःपुरस्योपवासकरणं तन्नंदीश्वरचैत्याराधनार्थमिति वक्ष्यन्ति ॥२५-२६॥

पुनः पराशङ्कामुत्थापयन्ति—

अह ववहारे पक्खिअदिणंमि चेइअजईण वंदणयं ।
भणिओ अ अभत्तट्ठो इमीइ गाहाइ वक्खाणे ॥२७॥

व्याख्या—सुगमा० यस्या व्याख्याने चैत्ययतिवन्दनमभक्तार्थश्च भणितं तां गाथां परोक्त्या दर्शयन्ति ॥२७॥

किइकम्मस्स अकरणे काउस्सग्गे तहा अपडिलेहा ।
पोसहिअतवे य तहा अवंदणे चेइसाहूणं ॥२८॥

व्याख्या—कृतिकर्म वन्दनकं तस्याकरणे, तथा 'काउस्सग्गि'त्ति । आवश्यकगतकायोत्सर्गविषयाकरणे, तथा जघन्यमध्यमोत्कृष्टभेद—भिन्नस्योपधेरप्रतिलेखे, तथा पौषधः-पर्व-अष्टमीपाक्षिकचतुर्मासिक—सांवत्सरिकरूपः, तत्र भवं तपः पौषधिकं, पूर्वद्वये चतुर्थमन्यत्र षष्ठाष्टमरूपं यत् तदकरणे, तथा चैत्यसाधूनामवन्दने प्रायश्चित्तं मास—लघ्वादि भवतीत्यध्याहारः । अस्याश्च गाथायाश्चूर्णौ सर्वेष्वप्येतेषु पदेषु पृथक् पृथक् प्रायश्चितमुक्तमस्ति । परमत्र पौषधादिचरमपद-द्वयाकरणोक्तप्रायश्चित्तस्यैव सोपयोगत्वात् चूर्णिरेवोपदर्श्यते । यथा—अट्ठमीए चउत्थं न करेइ मासलहू, पक्खिए चउत्थं न करेइ मास-गुरू, चउमासे छट्ठं न करेइ चउमासलहू, संवत्सरे अट्ठमं न करेइ चउमासगुरू इति । तथा चोक्तं—चउत्थछट्ठट्ठमकरणे अट्ठमिपक्ख-चउमासवरिसेसु । लहुओ गुरुओ लहुया गुरुया य कमेण बोधव्वा । चशब्देन एएसु चेव पव्वेसु चेइए साहूणो वा जे अण्णाए वसहीए ठिया ते न वंदइ तो मासलहू इति । अत्र पाक्षिके चतुर्थमुक्तमिति ।२८।

जीए वि पक्खिअदिणे उववासाई तवो इहं सुत्ते ।
निव्विइयगाइ पक्खिअ-पुरिसाइविभागओ नेयं ॥२९॥

व्याख्या—जीतेऽपि—जीतकल्पेऽपि पाक्षिकदिने उपवास आदि-शब्दादाचाम्लादि । यद्वा—तपः प्रतिदिनं करोति, ततः समधिकतरं तपः कर्त्तव्यतया भणितमिति शेषः । तदकरणे प्रायश्चित्तभणनात् । इह 'सुत्ति'त्ति । उत्तरार्द्धरूपे तदेव दर्शयन्ति 'निव्वीइ' इति । निर्विकृतिकम् आदिग्रहणात् पुरिमार्द्धादि प्रायश्चित्तं ज्ञेयमिति सम्बन्धः । कथं? पाक्षिकपुरुषादिविभागत इति । पाक्षिकपुरुषशब्दयोर्यथाक्रममादिविभाग शब्दाभ्यां सम्बन्धः । ततश्च पाक्षिकादीति । पाक्षिके, आदिशब्दा-च्चतुर्मासिक—सांवत्सरिकयोः क्रमाच्चतुर्थषष्ठाष्टमाद्यकरणे, पुरुषविभाग इति क्षुल्लकस्थविरभिक्षूपाध्यायाचार्यविभागेन यथाक्रमं निर्विकृतिकादि पुरिमार्द्धादि एकासनकादि प्रायश्चित्तं ज्ञेयमिति । पुरुषविभागश्चात्र-ग्रीष्मादिकालविभागस्योपलक्षणमिति । २९।।

ततश्चात्रापि पाक्षिके चतुर्थमुक्तमित्युक्त्वागमानुगतं पराभिप्राय-माशङ्क्य दूषयन्ति—

तो तत्थासंकिज्जइ पंचदसी सा न हुज्ज मा कहवि ।
पक्खिअमहानिसीहाइएहिं तं नो विरोहाओ ।।३०।।

व्याख्या—ततश्चतुर्दशीशब्दपरिहारेण पाक्षिके चतुर्थभणनात् तत्र उपदर्शितव्यवहारगाथाव्याख्यान-जीतकल्पसूत्रयोः आशङ्क्यते-हे प्रतिवादिन् ! त्वया आशङ्का क्रियते यदुत—पञ्चदशी सा प्रसिद्धा पौर्णमास्यमावास्यास्वरूपा 'पाक्षिकशब्दवाच्या पञ्चदशी' ति । तन्नो भवत्येव, पाक्षिकचूर्णि—महानिशीथादिशब्दोक्तदशाश्रुतस्कन्ध—समरादित्यप्रभृतिभिः सह विरोधात् । विरोधश्च पाक्षिकोक्तस्य तपोनुष्ठानविशेषस्य तेषु चतुर्दश्यामेव भणनात् । व्यवहारेण च विरोधः स्पष्ट इत्युक्तम् । तस्मादागमविरोधं परिहरमाणैरियं सामा-न्योक्तिर्विशेषोक्तेरविरोधेन व्याख्येया । न पुनरभिमानाद्दात्मकुगति-हेतुर्विरोधो बोधनीयः । यदाहुः पूज्यश्रीभद्रबाहुस्वामिनः—

'दुब्भासिएण इक्केण मिरिइ दुक्खसागरं पत्तो ।
भमिओ कोडाकोडिं सागरसिरिनामधिज्जाणं' ॥

'अल्पादपि मृषावादाद् रौरवादिषु सम्भवः ।
अन्यथा वदतां जैनीं वाचं त्वहह ! का गतिः ॥'

तस्मान्माध्यस्थ्यमास्थेयमिति ॥३०॥

अत्रैव परमाशङ्क्य दूषयन्ति—

**अह सव्वप्पामन्नं पुढो पुढो तेण न विरोहो वि ।**
**चउमासगं व एवं छट्ठेणं पक्खिअं पि भवे ॥३१॥**

अथ तेषां सर्वेषामपि पृथक् पृथक् प्रामाण्यं, ततः चतुर्दश्योक्तं तपः तस्यामेव कर्त्तव्यं, पाक्षिकोक्तं तु पञ्चदश्यां, तेन-कारणेन विरोधोऽपि नो भविष्यति । अत्रोत्तरं-'चउमासगं व' त्ति । एवमिति त्वदुक्ते क्रियमाणे चतुर्मासकवत् पाक्षिकमपि षष्ठेन स्यादिति ॥३१

अथ गाथाद्वयेन द्विराक्षेपं द्विरुत्तरमाहुः—

**अह होउ को विरोहो ? अट्ठमछट्ठाइवयणओ तं नो ।**
**अह चउदसीइ पढमो बीओ पुण पक्खिअंमि तवो ॥३२॥**

**चउमासगे वि एवं पावइ छट्ठं न जुज्जए तत्तो ।**
**तं पुण सुत्ते भणिअं छट्ठेण पडिक्कमेयव्वं ॥३३॥**

व्याख्या—अथ भवतु पाक्षिकमपि षष्ठेन, को विरोधः ? तत्रोत्तरम्-अष्टमषष्ठादि-पूर्वोक्तनिशीथगाथारूपवचनतो यत् त्वयोक्तं तन्नो भवति, चतुर्थेनैव पाक्षिकप्रतिक्रमणस्य तत्र भणनादिति भावः । अथोच्यते-चतुर्दश्यां प्रथमं चतुर्थं, द्वितीयं पुनः पाक्षिके तपः, ततश्च नास्ति पाक्षिके षष्ठप्रसङ्गः । प्राकृतत्वात्पुँस्त्वमिति ।

अत्रोत्तरं वितरन्ति-'चउमासगे वि'त्ति। चतुर्मासकेऽपि'एवमि'ति प्रथमं चतुर्थं चतुर्दश्यां द्वितीयं पञ्चदश्यां प्राप्नोति। ततश्च तत्र षष्ठं न युज्यते—न घटते। प्रथमचतुर्थस्य चतुर्दश्याराधनाय त्वयाऽङ्गीकृतत्वात्। 'तमि'ति तत्—चतुर्मासकं पुनः सूत्रे—समनन्तरातिदिष्टगाथारूपे भणितं। षष्ठेन प्रतिक्रमितव्यमिति। तस्मात् पाक्षिकं चतुर्दशीत्येकार्थमेव बोद्धव्यमिति ॥३२-३३।

तथा अत्रैवोपचयं दर्शयन्ति—

समणीणट्ठमिपक्खिअ—वायणकालेसु साहूवसहीए ।
गमणे चउद्दसीवंदणत्थगमणं विरुज्झेज्जा ॥३४॥

व्याख्या—श्रमणीनामष्टमीपाक्षिकवाचनाकालेषु साधुवसतौ गमने व्यवहारोक्तश्लोकेन नियमिते सति चतुर्दश्यां वन्दनार्थं तासां तत्र गमनं विरुध्येत—विरुद्धं स्यादिति ॥३४॥

तमेव श्लोकं यथोक्तमित्यागमपारतन्त्र्यमात्मन्याविर्भावयन्तो दर्शयन्ति—यथोक्तम्—

अट्ठमोपक्खिए मुत्तुं वायणालोयणाकालमेव य ।
सेसकालमयंतीओ नायव्वाऽकालचारिओ ॥३५॥

व्याख्या—'अष्टमोपाक्षिके' इति। चतुर्मासक-सांवत्सरिकयोरुपलक्षणम्। ततश्च नियतपर्वचतुष्टयं मुक्त्वा वायणाकालमेव य—मुक्त्वा शेषकालमागच्छन्त्यः संयत्योऽकालचारिण्यो ज्ञातव्याः। यदुक्तं—'ताओ दुविहाओ-कालचारिणीओ अकालचारिणीओ य। तत्थ कालचारिणीओ जाओ पक्खियाइसु इंति, एयव्वइरित्तेसु एज्जमाणीओ अकालचारिणीओ। सज्झायट्ठाए वा इंति। भत्तं पाणं वा दाउं गिण्हिउं वा इंति। कंदप्पट्ठाए वा इंति' इत्यादि। च शब्दोऽन्याऽनियतप्रयोजनागमनसूचनार्थः। तथा च ग्रामान्तरं गताः सन्तः

स्थविरा:, स्वेन सह समागता: साध्वीराकार्य पूर्वस्थितैकोपाश्रय-साध्वीनां स्वरूपं पृच्छन्ति। 'ताओ पुच्छियाओ इमं परिकहिंति। जा जत्तो गया सा पडिगया न चेव आलोएइ देसियराइयपक्खि-याइसु वा नत्थि आलोयणा। सच्छंदाओ आयरियउवज्झायवयणेणं न ठंति। सच्छंदं पवियरंति। विंटलगाणि य पउंजंति। गिलाणीए न पडितप्पंति। पाहुणियाण य वच्छल्लं न करिंति' इत्यादि। तथा-ऽऽलोचनादानार्थमप्यायान्ति। यत: किल श्रीमदार्यरक्षितात् परतो निर्ग्रन्थ्यो निर्ग्रन्थीनामेव पार्श्वे आलोचनां ददु:। तदारतस्तु श्रमणानामेव सकाशे तां ददन्ते। ततस्तदर्थमपि वसतावागमनं च-शब्द सूचितं मन्तव्यम्। एतदुक्तं भवति-नियतपर्वचतुष्टयवाचना-ऽऽलोचनादिविशिष्टप्रयोजनमन्तरेण यतिवसतौ गच्छन्त्योऽकाल-चारिण्य इति। यच्चात्र-'कत्थइ देसग्गहणं'मितिवचनात्। 'एत्थ-अट्ठमिगहणाउ चाउद्दसिगहणमवि न विरुज्झइ' बहुषु ग्रन्थेषु द्वयो-रपि साहचर्योपलम्भादिति केचित्तत्त्वज्ञा: प्रतिजानते।

तन्न सिद्धान्तानुकूलं, यतो यद्युपलक्षणव्याख्यानाच्चतुर्दश्यां यतिवन्दनं स्यात्तदा तदवन्दने तस्यां प्रायश्चित्तमपि 'अट्ठमिपक्खचउमासवरिसेसु'त्ति सूत्रे प्रतिपादितं स्यात्। न चात्रापि सूत्रे उपलक्षणत्वादष्टमी-प्रायश्चित्तमेव चतुर्दश्यां भविष्यतीति वाच्यम्। चूर्णिकृता तथा व्याख्यानाकरणात्। तथापि स्वच्छन्दतया तत्परिकल्पनेऽतिप्रसङ्ग: स्यादिति। यश्चात्र परैरित्थं विरोध उद्भाव्यते। यदुत-आर्यकालिका-चार्यात् परतो यथावस्थित एवैतस्मिन् श्लोके पञ्चदश्येव पाक्षिकशब्द वाच्येत्युच्यते तदारतस्तु चतुर्दश्येवेति स्पष्टो विरोध:। सोऽप्ययुक्त:। यतस्तदारतोऽपि चतुर्दश्येव पाक्षिकशब्दवाच्येति। कथं तर्हि-'एवं पि पज्जुसवणे' त्यादि प्रागुक्तगाथायामार्यकालिकाचार्यविहितत्वेन चतुर्दशी पाक्षिकशब्दवाच्या व्यवस्थापितेति। तदतीवासङ्गतम्। यतोऽभ्युपगमवादेन तदभिहितं न पुनर्व्यवस्थितसिद्धान्तेनेति नास्ति विरोधबोधगन्धोऽपीति ॥३५॥

अथालोचनाभणनद्वारेणागमोक्तगाथाद्वयपुरस्सरं तृतीयगाथयाऽत्रैव दूषणान्तरमुपदर्शयन्ति—

पक्खिअ-चाउम्मासे आलोअण निअमसा उ दायव्वा ।
गहणं अभिग्गहाणं पुव्वग्गहिए निवेएउं ॥३६॥
उत्तरकरणं एगग्गया य आलोअचेइवंदणया ।
मंगलधम्मकहाविअ पव्वेसु तवोगुणा हुंति ॥३७॥
इच्चाइसु सुत्तेसुं आलोअण पक्खिए धुवा भणिआ ।
तप्पडिसेहो अ अमावसाइ कह जुज्जइ जहुत्तं ? ॥३८॥

व्याख्या—द्वन्द्वैकवद्भावात् पाक्षिकचतुर्मासे, अस्य चोपलक्षणत्वात्

पक्खचउमाससंवत्सर उक्कोसं बारसण्हं वरिसाणं ।

समणुन्ना आयरिया फड्डुगवइणो य वियडंति ॥ इति निशीथागमे च सांवत्सरिके च । आलोचना—गुरोः समीपेऽभिव्याप्तया स्वकृतदुष्कृतप्रकटना सकारागमस्य प्राकृतत्वान्नियमेन दातव्या । अभिग्रहाणां च ग्रहणं कर्त्तव्यम् । पूर्वगृहीतान् तान्निवेद्य गुरोरिति शेषः । निरभिग्रहाणां किल न कल्पते स्थातुमिति । तथा 'उत्तरकरण' मिति—

अह्वो निच्चं तवोकम्मं सव्वबुद्धेहिं वण्णियं ।

जायलज्जासमावित्ती एगभत्तं च भोयणं ॥ इति परमगुरुप्रणीतप्रतिदिनक्रियमाणतपःकर्म्मापेक्षया विशिष्टतपःकरणेनात्मनः संस्करणम् खण्डितविराधितमूलोत्तरगुणानामालोचनादिना विशिष्टकरण वा । एकाग्रता च – गोचरचर्यादिबाह्यव्यापारतिरस्कारद्वारेण मनसः स्वस्थता । आलोच–आलोचना पूर्वोक्तस्वरूपा सा च विशिष्टतपः पूर्वकमेव दातव्या । चैत्यवन्दना प्रतीता । सा च तपसि कृते निवृत्ताहारादिव्यापारत्वेन निःप्रत्यूहा भवति । 'मंगल'—कल्याणं तच्च तपसि

कृते तदुत्तरकालं विघ्नाभावेन सम्पद्यते। धर्मकथा–तत्त्वोपदेशः। सा च तस्मिन् कृते सत्याहारादिव्यापाराभावेन निःप्रत्यूहा प्रवर्त्तते। अपि चेत्युक्तेतरस्वाध्यायादिशुद्धाध्यवसायसूचकम्। ततश्च ते पूर्वोक्ताः पर्वसु क्रियमाणस्य तपसो गुणा भवन्ति। 'इच्चाइसु'त्ति। इत्यादिषु निशीथाद्युक्तसूत्रेषु आलोचना पाक्षिके ध्रुवा-निश्चिता भणिता। तस्या-आलोचनायाः प्रतिषेधश्चामावास्यायां कथं युज्यते-केन प्रकारेण युक्तः स्यात्? पञ्चदशीप्रस्तुतप्रतिक्रमणत्वादिनाम्। 'यथोक्त'मिति पूर्वाचार्यप्रणीतसमनन्तरभण्यमानप्रतिषेधगाथोपदर्शनार्थम्। यच्चात्र प्रथमगाथायां पवे-अर्द्धमासे भवं पाक्षिकं पञ्चदशी-चतुर्दशी वा इति कैश्चिद् व्याख्यातं तत् परोपरोधादेवेति मन्तव्यम्। पाक्षिकदिनेऽवश्यं दातव्याऽऽलोचनाया अमावास्यायामत्यन्तक्षीणतिथित्वेन प्रतिषिद्धत्वात्। चतुर्दश्यां चतुर्थादिकरणस्य तदकरणे च प्रायश्चित्तस्याभिधानात् पञ्चदश्यां तु पारणकस्योक्तत्वात् व्यवहारादिभिर्विरोधसम्भवाच्च। तश्च महीयांसस्ते महनीयाः कथं प्रकटविरोधेऽप्येवं ब्रूयुः? ततः शङ्के परोपरोधादेवं तथा व्याख्यातमिति॥

निषेधमेवामावास्यायां दर्शयन्ति—

मुत्तुं दड्ढतिहीओ अमावसं अट्ठमिं च नवमिं च।
छट्ठिं च चउत्थिं बारसिं च आलोअणं दिज्जा ॥३९॥

व्याख्या—दग्धतिथ:—

'धणमीणगए बीया विसे य कुंभे य तह चउत्थी य।
ककडमेसे छट्ठी अट्ठमि मिहुणे य कन्ने य ॥ १ ॥
विच्छिय सीहे दसमी तुले य मयरे य बारसी भणिया।
एया दड्ढतिहीओ वज्जेयव्वा पयत्तेणं ॥ २ ॥

इति गाथोक्तस्वरूपाः नामग्राहोक्ततिथीश्च मुक्त्वा आलोचनां दद्यादिति। यतोऽन्यत्राप्युक्तं—

"पक्खिय चउमासाइसु नियमेणालोयणं मुणी देज्जा ।
गिहिज्जभिग्गहे पुण पुव्वगहिए निवेइत्ता" ॥
"काले दड्ढतिही तहा अमावसा अट्ठमी य नवमी य ।
छट्ठो य चउत्थी बारसी य दोण्हंपि पक्खाण" मिति ॥

तस्मादमावास्यायामालोचनाप्रतिषेधात् पाक्षिकेऽवश्यं तद्दातव्यत्वभणनान्न सम्भवत्येव पञ्चदश्यां पाक्षिकमिति । न च चतुर्थ्यामप्यालोचनायाः प्रतिषिद्धत्वात् सम्प्रति क्रियमाणपर्युषणपर्वण्यप्यालोचनादानाऽसम्भव इति वाच्यम् । चतुर्थीप्रतिषेधस्य तदितरचतुर्थीदिनेषु सावकाशत्वात् । अमावास्यायास्तु युष्मदभिप्रायेण पाक्षिकपर्वोऽन्यामायाः सम्भवाभावात् तत् प्रतिषेधक(का)नामसावकाशः स्यादिति । न चास्वाध्यायादिकेऽपि पाक्षिकसूत्रभणनवत् प्रतिषिद्धदिनेऽप्यवश्यं पर्वालोचना दातव्या । अनियताऽऽलोचनायां पुनरमावास्याप्रतिषेधश्चरितार्थो भविष्यतीति वाच्यम् । पाक्षिकानुष्ठानानां पूर्वमेव चतुर्दश्यां व्यवस्थापितत्वात् । पक्षान्तेऽवश्यदातव्यत्वेनालोचनायां अनियतत्वस्यैवासम्भवाच्च ॥३९॥

अथ युक्तिजालकीलिकानिकरेण चतुर्दश्यां पाक्षिकशब्द नियन्त्र्योपसंहरन्ति दूषणान्तरं चोपक्षिपन्ति –

**तम्हा चउद्दसी पक्खिअं च वीसुं न पव्वदुगमेयं ।**
**सामन्नओ अ पक्खिअमाइट्ठं पक्खसंधीए ॥४०॥**

व्याख्या—तस्माच्चतुर्दशी पाक्षिकं च न विष्वक् पर्वद्वयमेतत् । यदि ह्येतत् पृथक् पर्वद्वयं स्यात्तदा युगपद्प्यागमेऽनयोः कुत्रचिद् भणनं स्यात्, न चोपलभ्यते । तथाहि–'अट्ठमि चउद्दसीसु सव्वाणि चेइयाणि वंदियव्वाणि' इत्यावश्यकचूर्णिः । 'अट्ठमि–चउद्दसीसु उववासकरण' मिति पाक्षिकचूर्णिः । 'अट्ठमिपक्खिए मुत्तुमिति चउत्थछट्ठट्ठमकरणे अट्ठमिए पक्खचउमासवरिसेसु' इति व्यवहार-

भाष्यम् । 'अट्ठमछट्ठचउत्थं संवत्सरचाउम्मासपक्खेसु'त्ति निशीथ-भाष्यम् । 'अट्ठमिचउद्दसीसु पडिमं ठाएगराइय' मति पञ्च शद्वि-वरणं । 'जइ सइ बले सइ पुरिसक्कारपरक्कमे अणरूणं अट्ठमि पक्खि-चाउम्मासियसंवच्छरिएसु' न करेइ तो पायच्छित्तं विसंभोगो वा' इति पञ्चकल्पचूर्णि: । 'अट्ठमीए चउत्थं न करेइ मासलहु । पक्खिए चउत्थं न करेइ मासगुरु । चउमासे छट्ठं न करेइ चउमासलहू । संवच्छरिए अट्ठमं न करेइ चउमासगुरु' त्ति व्यवहारचूर्णि: । 'अट्ठमिचउद्दसी-नाणपंचमि-चउमास-संवच्छरिएसु चउत्थ-छट्ठ-ट्ठमे न करेंति तो पच्छित्त'मिति महानिशीथसूत्रम् । इत्यादिषु सूत्रेष्वेकोपा-दानेऽन्योपादानस्यादर्शनात् ज्ञायतेऽनयोश्चतुर्दशीपाक्षिकयोरेकार्थ-त्वमिति । तथा सामान्यत एव पाक्षिकमादिष्टमाख्यातं श्रीभद्रबाहु-स्वामिभि:-'जह गेहं पइदियहंपी'त्यादौ समनन्तरगाथायां पक्षसन्धौ, न पुन: पञ्चदश्यां पाक्षिकमिति विशेषत इति ॥४०॥

तामेवावश्यकोक्तगाथां दर्शयन्ति—

जह गेहं पइदियहं सोहिअं तहवि पक्खसंधीसु ।
सोहिज्जइ सविसेसं एवं इहयंपि नायव्वं ॥४१॥

व्याख्या—अत्र चूर्णिरपि-'जइ गेहं दिवसे पमज्जेज्जंतंपि पक्खाइसु विसेसेण उवलेवणाईहिं सोहिज्जइ । एवं साहू वि पक्खा-इसु विसेसेण सोहिं करेंति' त्ति सामान्येनैवेति ॥४१॥

पक्षसन्धिशब्दस्योभयतिथिवाचकत्वेन साधारणत्वं निरूप्य हेतुकं स्वाभिप्रेततिथिवाचकत्वे नियमं निरूपयन्ति—

चरमदुचरमतिहीणं रूढं जइ नाम पक्खसंधीसु ।
सविसेसकिच्चभणणा चउद्दसी चेव सो जुत्तो ॥४२॥

व्याख्या—चरमा—पञ्चदशी, पश्चानुपूर्व्या चरमाया द्वितीया द्विचरमा-चतुर्दशी ततः तयोः यदि नाम पक्षसन्धित्वं रूढं प्रोक्तनीत्या तथापि पूर्वोक्तप्रकारेण सविशेषकृत्यानां चतुर्दश्यामेव भणनात् स पक्षसन्धिश्चतुर्दश्यामेव युक्तः प्रकृतगाथायामिति। यच्चात्र केचन-'कत्तियबहुलस्स पन्नरसीपक्खेणं जा सा चरमा रयणी तं रयणीं च णं समणे भगवं महावीरे कालगए विइक्कंते छिण्णजाइजरामरण-बंधणे सिद्धे बुद्धे मुक्के परिनिव्वुर त्ति। तं रयणीं च णं नव मल्लइ नव लिच्छइ य कासीकोसलगा अट्ठारस गणरायाणो वाराभोए पोसहोववासं पट्ठवइसु, वुच्छिन्ने भावोऽज्जोए दव्वुज्जोत करिस्सामो' इति। कासी-वाराणसी तज्जनपदश्च तत्सम्बन्धिनो मल्लकिनामानो नव कोशला-अयोध्या तज्जनपदश्च तत्सत्काश्च लेच्छकिनामानो नव मिलिताश्चाष्टादश। प्रयोजने च सति गणकारित्वात् गणप्रधाना राजानो ये ते तथा। 'वाराभोए' इति। वारमाभोग्यते—अवलोक्यते यैस्ते वाराभोगाः—प्रदीपाः तान् न ते केवलं पौषधोपवासं प्रस्थापितवन्तः-कृतवन्तः प्रदीपांश्च द्रव्योद्योतरूपान् भावोद्योते गते सतीत्यर्थः। इति पञ्चदशीसूत्रवचनादमावास्यायाः पक्षसन्धित्वं वणयन्तो अष्टादशानां राज्ञां च तत्र पौषधोपवासं दर्शयन्तः पक्षप्रतिक्रमणं पञ्चदश्यां समर्थयन्ति। तदयुक्तम्—अत्र चरमरजनित्वमात्रप्रतिपादनेन पक्षसन्धित्वस्यानियन्त्रणात् रूढितश्चरमद्विचरमतिथिव्यापी हि पक्षसन्धिशब्दश्चरमतिथावेवं कथं नियतः स्यात्? वृक्षत्वमिवाम्रत्वे। तस्मात् पक्षप्रतिक्रमणसहचरानुष्ठानानां चतुर्दश्यामुपलम्भात् तत्रैव तद्युक्तम्। यत्तु तस्यां रजनावष्टादशकाशीकोशलाधिपतीनां पौषधोपवासकरणं तत् कुतोऽप्यहमहमिकया संचरिष्णु रोचिष्णुविमानमालासहस्र-सङ्कुलनभस्तलविलोकनादेः कारणाद्विज्ञातभगवन्निर्वाणकल्याणक-महोत्सवानां तद्दिनाराधनार्थं चतुःपर्वीसमाराधनार्थं नन्दीश्वर-चैत्यपूजनार्थं च ज्ञातव्यम्। न पुनः प्रतिक्रमणार्थम्। प्रक्रमे प्रतिक्रमण-नाम्नोऽप्यश्रवणादिति ॥४२॥

अथ पुनः पराशयमाशङ्कते—

दिवसाइं अह पनरस चउमासाओ चउद्दसीदिवसे ।
नो पुज्जंति तओ कह एइए पक्खपडिकमणं ॥४३॥

व्याख्या—चातुर्मासिकस्य पूर्णिमायां क्रियमाणत्वेन चतुर्दश दिनान्येव ततस्तद्दिवसे भवन्तीति पराभिप्रायः । 'एइए' इत्यनेन वृत्तिछन्नाया अपि चतुर्दश्या ग्रहणमिति ॥४३॥

अत्रोत्तरं वितरन्ति—

बाहुल्लवयणमेअं पक्खे जं हुन्ति पनरस दिणाइं ।
अन्नह पज्जोसवणाउ पक्खिअं कह णु पुज्जिज्जा ? ॥४४॥

व्याख्या—पूर्वार्द्धं सुगमं । 'अन्नह'त्ति । अन्यथा पर्युषणापर्वणोऽनन्तरं भवदभिप्रेततिथावपि पाक्षिकं कथं पूर्येत ? दिनदशकस्यैव तत्र भावात् । यच्च 'पन्नरसण्हं दिवसाणं'मित्यादिदण्डकसूत्रात् पञ्चदशी तत्पर्वतया व्यवस्थाप्यते । तदप्यनुपपन्नम् । यतश्चतुर्मासिक-सांवत्सरिकपर्वानन्तरदिनपञ्चकमपि यावत्क्षामणके क्रियमाणे दण्डकसूत्रं तथाविधमेवाभिधीयते इति त्वयापि प्रतिपन्नम् । ततः कथं ततः तद्व्यवस्था तस्मान्न्यूनाधिकेष्वपि दिनेषु सत्सु अखण्ड-दण्डकभणनमेव श्रेयस्करमिति ॥४४॥

सम्प्रति दिनचतुर्दशकेनापि पक्षो भवतीति लोकसमयं सामत्यं दर्शयन्ति—

लोगेवि सिद्धमेयं जह किल वरिसंमि हुंति छप्पक्खा ।
दिणचउदसगेण तहा समए वि फुडक्खरं भणिअं ॥४५॥

व्याख्या—सुगमा । नवरं लोके मासपक्षाऽनियतत्वेन षट् पक्षा दिनचतुर्दशकेनोक्ता इत्यभिप्रायाल्लोकापेक्षया समये स्फुटाक्षरमित्युक्तम् ॥४५॥

अथोत्तराध्ययनादिसमयोक्त्या स्फुटाक्षरत्वमेव दर्शयन्ति—

आसाढबहुलपक्खे भद्दवए कत्तिए य पोसे य ।
फग्गुणवइसाहेसु अ बोधव्वा ओमरत्ताउ ॥४६॥

व्याख्या—सुगमा । नवरं बहुलपक्खे इति भाद्रपदादिष्वपि प्रत्येकमभिसम्बध्यन्ते 'ओमि'त्ति । अवमा-न्यूना एकेन दिनेनेति शेषः । 'रत्ति'त्ति । अहोरात्राः । एवं चैकैकदिनापहारे दिनचतुर्दशकेनैव कृष्णपक्ष एतेषु । एतदुक्तं स्वयमेव पूज्यैः कालविचारे—

'इह होइ ओमरत्तं एगं इगसट्ठिदिवस अंतमि ।
बासट्ठिमा तिही जं खिज्जइ एवइयदिवसेहिं ॥१॥

एवं छ ओमरत्ता छावट्ठि सएहिं तीहि दिवसाण । आदित्य-संवत्सरेणेत्यर्थः ॥

भणियं छ तिहीओ वीरेहि समं न लब्भंति ।
एए य कसिणपक्खे हवंति न सुक्कपक्खंमि ॥

जत्तो बीयाउ इमं तं जाण विसेससुत्ताउ । इति । यच्चात्र परैरुक्त-मवमरात्रगणना न प्रमाणमिति । तदपि सिद्धान्तबोधवन्ध्यम् 'अंगुलं सत्तरत्तेणे'त्यादि गाथासु तस्यापि प्रमाणीकृतत्वात् । तथा चैतद् वृत्तिः-केषुचिन्मासेषु दिनचतुर्दशकेनापि पक्षः सम्भवति, तत्र च सप्तरात्रेणाप्यङ्गुलवृद्धिहान्योर्न कश्चिद् विरोध इति ॥४६॥

अथ चन्द्रक्षयवृद्धयाद्युपलक्षितसूर्यप्रज्ञप्त्याद्युक्तपञ्चदशदिन-प्रमाणपक्षसङ्कल्पं परेषां निरस्यन्ति—

पक्खो अ चंदसिद्धो न घिप्पए वच्छरुव्व इह सुत्ते ।
किं पुण चउद्दसीओ तिहीओ सो चउद्दसी जाव ॥४७॥

व्याख्या—इह सूत्रे इति 'पन्नरसण्हं दिवसाणमि'त्यादि पक्ष-क्षामणासूत्रे पक्षश्चन्द्रसिद्धः— चन्द्रकलाक्षयवृद्धिनिष्ठापक एको-

नत्रिंशदहोरात्र द्वात्रिंशद् द्विषष्टिभागनिष्पन्नस्य कृष्णप्रतिपदारब्ध पूर्णमासीनिष्ठितस्य चन्द्रमासस्याऽर्द्धप्रमाणस्वरूपो न गृह्यत एव, चकारस्यैवकारार्थत्वात् । किंवदित्याहुः—'चन्दरुव्व'त्ति । उक्तचन्द्र-मासनिष्पन्नचतुःपञ्चाशदुत्तरशतत्रयद्वादशद्विषष्टिभागप्रमाणचान्द्र — संवत्सरवत् । किं पुनश्चतुर्दश्यास्तिथेरारभ्य चतुर्दशीं यावदिति । इदमत्रैदम्पर्यं—यथा भाद्रपदपञ्चमीमादीकृत्य पुनस्तस्यां संवत्सरो भवति दिनषट्कन्यूनत्वेऽपि तदालापकापेक्षया तथा चतुर्दशीमादी-कृत्य चतुर्दश्यामेव पक्ष इति । न केवल पूर्वोक्तागमन्यायान्मुनीनाम-नुष्ठानपक्षश्चतुर्दशी किन्तु लौकिकशास्त्रप्रसिद्ध्यापि । यदाह वराह-मिहीरटीकाकृत्—'यस्मिन् दिने दिवसस्य प्रहरद्वये चन्द्रस्योदयो भवति यस्मिन् दिने रात्रेः प्रहरद्वये चन्द्रस्योदयो भवति तावेतौ निर्दिष्टावष्टमितिथिपक्षौ मुनीनामनुष्ठानपक्षाविति । यस्मिँस्तिथौ कलङ्कविकलश्चन्द्रो भवति यस्मिँस्तिथौ कलैकशेषश्चन्द्रो भवति तस्मिन्नेव तिथौ पक्षस्यारम्भः पक्षस्यावसानमिति चतुर्दश्यौ तन्मुनी-नामनुष्ठानपक्षाविति ।४७॥

अथ 'ववहारे पुण भणिया पक्खियसद्देण चउद्दसी चेव' इति पूर्वोक्तां स्वप्रतिज्ञां समर्थयन्तो गाथाद्वयं प्राहुः —

विज्जाणं परिवाडिं पव्वे पव्वे अ दिंति आयरिआ ।
मासद्धमासिआणं पव्वं पुण होइ मज्झं तु ॥४८॥

पक्खस्स अट्ठमी खलु मासस्स य पक्खिअं मुणेअव्वं ।
सुत्ते विय चुन्नीइ पक्खिअं चउद्दसी भणिआ ॥४९॥

व्याख्या—'साहणजुत्ताथीदेवया य विज्जा' इत्येवं लक्षणलक्षिता विद्यास्तासां परिपाटिं-वाचनानुज्ञारूपां पर्वणि पर्वणि गुणाधिक-शिष्येभ्यो ददत्याचार्याः । पर्व पुनर्मासार्द्धमासयोर्मध्यमेव भवति,

चकारस्यैवकारार्थत्वात् । एतदेव विशेषयन्ति–'पक्खस्स'त्ति । पक्षस्य मध्यमष्टमी मासस्य मध्यं पाक्षिकमेव मुणितव्यं 'चाउद्दसिग्गहो होइ' इत्युत्तरगाथासूत्रे नियन्त्रितचतुर्दशीरूपम् । तथा एतत्सूत्रचूर्णावपि पाक्षिकं चतुर्दशी भणिता ।

अत्र पुनः पूज्योक्तैव काचिद् व्याख्या विशेषावबोधार्थं लिख्यते । यथा—आयरिय उवज्झाए णं एगरायं वा दुरायं वा तिरायं गणाओ वीसु ं वसमाणे नाइक्कमइ इति व्यवहारसूत्रम् । अथाऽस्य श्रीभद्रबाहुस्वामिविरचितमेव भाष्यं-विज्जाणं परिवाडी' गाहा–पूर्वोक्ता ।

'पक्खस्स अट्ठमी खलु मासस्स य पक्खिअं मुणेयव्वं ।
अण्णंपि होइ पव्वं उवराओ चंदसूराणं ॥२॥

चाउद्दसिग्गहो होइ कोइ अहवा वि सोलसिग्गहणं ।
वत्तं तु अणज्जंते होइ दुरायं तिराय वा ॥३॥

अथाऽस्य गाथात्रयस्य तदक्षरैव चूर्णिः— 'विज्जाणं परिवाडी' त्यादि गाथा कण्ठ्या । 'पक्खस्से' त्यादि । व्याख्या–पक्खपव्वस्स मज्झ अट्ठमी बहुलाइया मास त्ति काउं, मासस्स मज्झ पक्खिअं, किण्हपक्खचउद्दसीए विज्जाण साहणोवयारो । सेसं कंठ । आह च–यद्येवम् एकरात्रग्रहणं कर्त्तव्यम् । किं द्विरात्रत्रिरात्रग्रहणेनेति ? उच्यते–'चाउद्दसि ग्गहो होइ कोइ' इत्यादि कण्ठ्यम् । अयमस्या गाथाया भावार्थः–किलेह सूत्रे एकरात्र द्विरात्रं त्रिरात्रं वा गणात् पृथगाश्रये आचार्य उपाध्यायो वा एकाकी विद्यायाः पाठार्थं पर्वदिनेषु वसन् आज्ञा नातिक्रामतीत्युक्तमास्ते । तन्नैकरात्रं वासस्तावद्युज्यते । पर्वदिनानामष्टमीचतुर्दशी उपरागरूपाणं परस्परं व्यवधानेन भावात् । यः पुनर्द्विरात्र त्रिरात्रं वा वासः सूत्र उपदिष्टः स कथं युज्यते ? नैरन्तर्येण पर्वद्वयस्य त्रयस्य वाऽभावादिति परेण प्रेरिते भगवान् भद्रबाहुस्वाम्याह–'चाउद्दसिग्गहो होइ' इत्यादि । चतुर्दश्यां पूर्व–

गाथायामेव 'मासस्स य पक्खिअं मुणेयव्व'मितिवचनेनोपात्तायां ग्रहो-ग्रहणं भवति कश्चिद्विद्यानाम् अथवा'वो'ति पक्षान्तरसूचनार्थः। षोडशीग्रहणं षोडश्यां चन्द्रसूर्योपरागोपलक्षितायां प्रतिपल्लक्षणायां तिथौ सूर्यग्रहणे कृष्णपक्षाग्रभाविन्यां चन्द्रग्रहणे च शुक्लपक्षाग्रभाविन्यां यद्ग्रहणं भवति विद्यानां कासाञ्चित्। एवं च यदा कुतोऽपि मेघान्धकारादेर्भ्रान्तिकारणात् सम्यग् अविज्ञायमाने अमावास्या-प्रतिपदोः सूर्यग्रहणे पूर्णमासीप्रतिपदोश्चन्द्रग्रहणे प्रस्तुततिथि-विभागे विद्याग्रहणं क्रियते तदा द्विरात्रं त्रिरात्रं वा वासो भवति। तत्र कृष्णचतुर्दश्यां प्रगुणवृत्त्यैव विद्याग्रहणानुज्ञानात्। एवं प्रति-पत्तिथावपि भ्रान्तेश्चामावास्या रात्रावपीति त्रिरात्रं द्विरात्रं वा भ्रान्त्या पूर्णमासीप्रतिपदोर्विद्याग्रहणेनेति। ततश्चात्र सूत्रे-पाक्षिकं चतु-र्दशीति व्याख्यानयन् भगवान् भद्रबाहुस्वामी चूर्णिकारश्च ज्ञापयति यदुत—सर्वसूत्रेष्वपि पाक्षिकशब्देन चतुर्दश्येवोपात्ता इति ॥४८-४९॥

अथ पक्षशब्द चतुर्दश्यां सुनिश्चितं विधाय परेषां भ्रान्तिमुद्भावयन्ति —

**विज्जासाहणसुत्तंमि पक्खिअं चउद्दसी न सेसंमि।**
**जं पुण भणंति केई उग्गो मोहग्गहो एस ॥५०॥**

व्याख्या— चउद्दसिदिणं विज्जापरिवाडिदाणमासज्ज भणियं न उण पक्खियपडिकमणनिमित्तमित्यादि प्रतिजानाना विद्या-साधनसूत्रे पाक्षिकं चतुर्दशी, न शेषे आवश्यकानुष्ठाने इति यद्वदन्ति केचिदागमरहस्यानभिज्ञाः। स एष उग्रः-प्रचण्डो मोहग्रहस्तेषाम-पारसंसारकान्तारान्तःप्रचारकारणसद्बोधापहारहेतुत्वात्। यदि च विद्यासाधनमेवाश्रित्य चतुर्दश्यां पाक्षिकशब्दप्रवृत्तिः स्यात् तदा तत् प्रतिक्रमणसहचरोपवासाद्यनुष्ठानानां तस्यामुपलम्भः पूर्वोक्त-युक्त्या पञ्चदश्यां तु तदनुपलम्भः कथं स्यात्? तस्मात्-उग्रमोहग्रह एवायमिति। न चैतदाक्रोशमात्रं यतः परमाराध्यैरप्युक्तं—

पयमक्खरंपि एक्कंपि जो न रोएइ सुत्तनिद्दिट्ठं ।
सेसं रोयंतो वि हु मिच्छद्दिट्ठी मुणेयव्वोत्ति ॥५०॥

अथ चतुर्दश्यां पाक्षिकशब्दसिद्धावपि कथं तत्प्रतिक्रमणसम्भव ? इत्याहुः—

आवस्सयचुन्नीए पक्खिअदिवसंमि पक्खपडिक्कमणं ।
भणिअमओ संसिज्झइ चउद्दसी पक्खपडिक्कमणं ॥५१॥

व्याख्या—चतुर्दश्यां पूर्वोपदर्शितन्यायेन पक्षशब्दवाच्यत्वे सिद्धे सिद्धमेव सामर्थ्यादावश्यकचूर्णावुक्तं पक्षप्रतिक्रमणं तस्यामिति भाव इति ।५१॥

अथ परमगुरुप्रणीतागमोपनिषन्निकषोद्धृतयुक्तिजालेन पाक्षिकं प्रतिक्रमण चतुर्दश्यां व्यवस्थाप्याऽऽचरणामपि तदनुकूलां कलयन्तः प्राहुः—

परिहारिविहारीणं गीयत्थाणं च पुव्वसूरीणं ।
एस च्चिय आयरणा अलंघणिज्जा जओ भणिअं ॥५२॥

व्याख्या—आधाकर्म्मादि दोषपरिहरणशीला विहारशीलाश्च एते परिहारिविहारिणः ।

यथोक्तं—आहाकम्माइणं काए सावज्जजोगकरणं च ।

परिहारीव परिहरं अपरिहरंतो अपरिहारी । इति । सामान्येन वा ये उद्यतविहारिणः ते परिहारिविहारिणः तेषां तत एव गीतार्थानां विदितसूत्रपरमार्थानां पूर्वसूरीणामेषैव चतुर्दश्यां प्रतिक्रमणकरण—रूपैवाचरणा अलङ्घनीया भवति । यतो भणितं श्री भद्रबाहुस्वामिभिः सूत्रकृन्निर्युक्तौ ॥५२॥

तदेव दर्शयन्ति—

आयरियपरंपरएण आगयं जो उ छेयबुद्धीए ।
कोवेइ छेयवाई जमालिनासं स नासिहीइ ॥५३॥

व्याख्या—आचार्याः—सुधर्मस्वामी—जम्बूनाम—प्रभवाऽऽर्यरक्षिता-द्यास्तेषां प्रणालिका पारम्पर्यं तेनागतं यद्व्याख्यानं—सूत्राभिप्राय-स्तद् यः कुतर्कदर्पाध्मातमानसो मिथ्यात्वोपहतदृष्टितया छेकबुद्धय-निपुणबुद्ध्या कुशाग्रीयशेमुषीकोऽहमिति कृत्वा कोपयत्यभिभवति। सर्वज्ञादिप्रणीतमप्यर्थमन्यथा प्ररूपयति स जमालिनाश नङ्क्ष्यति। यथा किल जमाली 'क्रियमाणं कृत' मिति भगवद्वचस्तत्त्वबहिर्भूत प्रतिजानानः स्वप्रज्ञाप्रकर्षेण 'कृतमेव कृत' मित्यभिमन्यमानः कुबोध सन्तमससमाच्छादितविवेकतरणिः समपदिष्टाश्रितलोकचतुर्गतिससार-सरणिः सद्बोधप्रध्वंसरूपं नाशं जगाम तथाऽन्योऽपीति। न चैतत् पूर्वाचार्यैर्नाचरितं शठैर्वा सम चरितमिति मन्तव्यम्। सिद्धान्तो-पनिषन्निषन्नबुद्धि भवद्गुरुपरम्परयैव समाचीर्णत्वात्।

'असढेहिं समाइन्नं जं कत्थइ केणई असावज्जं।
न निवारियमन्नेहिं बहुमणुमयमेयमायरियं'॥

इत्याचरितलक्षणयोगाच्च। अन्यच्च सर्वस्याप्यनुष्ठानस्य निरस्ताभि मानः कश्चिदुपदेष्टाऽन्वेष्टव्यः। तदत्र भवतां पञ्चदशी पाक्षिक-प्रतिक्रमणकरणे को नामोपदेशकः संवृत्तः। न तावद् भवदाद्यपुरुष-स्यानन्तरो गुरुस्तस्य स्वयं चतुर्दश्यामेव प्रतिक्रमणकरणे प्रवृत्त-त्वात्। स्वशिष्यवत्सलस्यापि तस्य तेभ्यस्तदनुपदेशकत्वाच्च। नापि परम्परागुरुर्भवदाद्यपुरुषेण तस्यादर्शनात् तथाविधतत्प्ररूपितसत्प्र-वादाश्रवणाच्च। तस्मादमानाभिमानग्रहग्रस्तबुद्धिना वोरःकिकास्रदेव दुःश्राद्धश्रद्धाप्रवर्त्तकेन। तथाऽनुसर पूर्वाचार्यपरम्परापरिचितममुं मार्गं। यतः स्फुटानधिगततत्त्वानामयमेव मिथ्यात्वमन्धाः पन्थाः सम्यगिति निधूतितमांसि स्ववचांसि।

को तत्तो पावयरो सम्मं अणहिगयसमयसब्भावो।
अन्नं कुदेसणाए कट्टयरागंमि पाडेइ॥

इति सिद्धान्तोक्तीश्च प्रतिपादयद्भिः श्री मुनिचन्द्रसूरिभिर्निवार्य-

माणेनापि तेनैव प्ररूपितोऽयं मार्गः। स च विशुद्धसिद्धान्तानुगतमतीनां मोक्षकारणानुष्ठानरतानाम्।

एक्केण कयमकज्जं करेइ तप्पच्चया पुणो अन्नो।

सायाबहुलपरंपरवुच्छेओ संजमतवाण' ॥ मित्यागमप्रतिपत्त्या प्रमाणीकृतसर्वज्ञयतीनां सद्यतीनां सतां भवतां नोचितः समाश्रयितुम्। यदुक्तम्-अस्मद्गुरुभिः श्रीमद्देवसूरिभिः स्याद्वादरत्नाकरे—

'यदेव हि सुयुक्तिकं तदेव हि सज्जनः सेवते।

न तु स्वपितृकुकुरोद्वहननीतिमालम्बते इति। अन्यच्च मात्सर्यचर्यापरिहारेण परिभावयन्तु भवन्तः किमेतत् पक्षपरिग्रहकारिणः साक्षादनधिगतसमयसारस्यापि स्वप्रकल्पितपथप्रचारिणस्तस्यैदंयुगीनागमरहस्यदक्षं चतुर्दशीपाक्षिकमित्यत्र बद्धकक्षं स्वगुरुकुलपक्षं परित्यजतः कष्टानुष्ठाननिष्ठासुप्रतिष्ठा न वेति। यतः परमागमे प्रत्यपादि—'सुद्धुं छाइसु जत्तो गुरुकुलचागाइणेह विन्नेओ।

सबरससरक्खपिच्छत्थघायपायाछिवणतुल्लो' ॥ इति। तस्मादाग्रहत्यागेनैव क्रियमाणमनुष्ठानं शुभं—शुभानुबन्धि भवतीति परिभावनीयं सूक्ष्मबुद्धया ॥ ५३ ॥

अथ स्वोत्प्रेक्षिततत्त्वमात्रपरिहारद्वारेण माध्यस्थ्यमात्मन्याविर्भावयन्तः प्राहुः—

जइ हुज्ज दुण्णि दिवसे चेइयजइवंदणोववासो अ।
कस्स न हुज्जाणुमयं परं न सुत्तेण संवयइ ॥५४॥

व्याख्या—यदि स्यात् द्वौ दिवसौ चतुर्दशीपञ्चदशीरूपौ प्रतीत्य चैत्ययतिवन्दनोपवासश्च कस्य न स्यादनुमतं ? परं सूत्रेण निशीथ-व्यवहारादिना पूर्वोक्तप्रकारेण न संवदतीति ॥५४॥

अथ साधूनां पाक्षिकप्रतिक्रमणविधिं चतुर्दश्यां निश्चित्य श्राद्धा-

नामपि तत्रैव तं दर्शयन्ति—

जंमि दिणे साहूणं जुत्तो सो तंमि सावयाणंपि ।
पक्खपडिक्कमणविही तवाइतुल्लत्तभावाउ ॥५५॥

व्याख्या-'तवाइतुल्लत्तभावाउ'त्ति । चतुर्थचैत्यवन्दनालोचनादेः समानताभावादित्यर्थः । शेषं सुगमम् ॥५५॥

अथैतान्येव तपश्चैत्यवन्दनादीन्यागमोक्तानि श्राद्धानामपि चतुर्दश्यामेवेति गाथात्रयेण दर्शयन्ति—

देवीपभावई जं पडिमाए जियंतसामिणीए अ पुरो ।
अट्ठमिचउद्दसीसुं नट्टुवहारं सयमकासी ॥५६॥
पुत्थयवायणमुववास-करणमट्ठमिचउद्दसीदिवसे ।
जिणदाससावओ कासि पोसहं पुण उदाइनिवो ॥५७॥
एयं पुण सविसेसं भणियं आवस्सयाइचुण्णीसु ।
पक्खिअविसेसकिच्चं जाणंता चउद्दसीदिवसे ॥५८॥

व्याख्या–देवी प्रभावती यत् प्रतिमाया जीवत्स्वामिन्याः पुरोऽष्टमीचतुर्दश्योर्नाट्योपहारं-नाट्येनोपलक्षितां पूजां स्वयमकार्षीदिति सङ्क्षेपार्थः ।

व्यासार्थः कथानकादवसेयस्तच्चेदम्–जम्बूद्वीपभरते चम्पानगर्यामनङ्गसेनः सुवर्णकार आसीत् । स च पञ्चशैलद्वीपाधिपतिविद्युन्मालिदेवपत्नीभ्यां पतिविप्रयुक्ताभ्यां हासाप्रहासाभ्यां स्त्रीलोलत्वाद् रूपलोभितः सन् पटहोद्घोषणापूर्वकं नावारूढो वृद्धनाविकोपदेशाद्वटद्रुमावलग्नो भारण्डपक्षिपादावनद्धदेहयष्टिः पञ्चशैलद्वीपं प्राप्तः । ततश्च मनुष्यशरीरेणाऽऽवां नोपभोक्तुं पार्यावहे, अतस्त्वमस्मन्निमित्तं निदानं कुर्वित्युक्त्वा ताभ्यां चम्पाया-

मेव निक्षिप्तः । तदनु तद्वियोगविधुरो 'हासाप्रहासे' इत्यादि प्रलपन्नागिलश्रावकेण निवार्यमाणोऽपि कृतनिदानः सन् इङ्गिनीमरण प्रतिपद्य पञ्चशेलाधिपस्तयोः पतिर्विद्युन्माली बभूव । नागिलश्रावकस्तु कृतविशिष्टसंलेखनाक्रियोऽच्युतेन्द्रसामानिकः सञ्जज्ञे । तयोरुभयोरपि नन्दीश्वरयात्रायां परस्परं दर्शनमभूत् । ततो नाइलदेवोऽवधिना विज्ञाय प्रतिबन्धबन्धुरः समीपीभूय पूर्वभववृत्तान्तस्मारणपूर्वकं प्रतिबोध्य भवान्तरबोधिलाभाय जीवत्स्वामिनः प्रतिमानिर्मापणोपदेशं तस्मै दत्त्वा स्वस्थानं ययौ । विद्युन्माली तु तदा नन्दीश्वरयात्रानन्तरं क्षुल्लहिमवति गत्वा गोशीर्षदारुमयीं देवतानुभावेन श्रीवीरप्रतिमां निर्माय नानाऽलङ्कारहारिणीं च विधायाऽपरगोशीर्षदारुशकलस्य मध्ये निधाय चिन्तयामास । कुत्र एनां निधास्यामीति । ततश्च समुद्रान्तः षण्मासावधि दुर्वातोत्कलिकान्दोल्यमानयानपात्रस्थितं भीतोद्विग्नं दुर्वारपरिमलोद्गारघनसारसारधूपकडच्छुकविहस्तहस्तं कृतेष्टदेवतोपचारं वणिजं विलोक्य विद्युन्माली बभाषे । भोः कल्याणिन् ! मा विषीद प्रातस्ते यानपात्रं वीतभयनगरपरिसरतीरं प्राप्स्यत्यस्मदनुभावात् । परमस्मद्वचनादुदयननृपतिस्त्वया तत्रेदं वाच्यो, यदुत–'अनेन गोशीर्षचन्दनेन देवाधिदेवप्रतिमा कार्ये'ति देवाज्ञप्तिरिति । ततः स तथा प्रतिपद्य वीतभयपत्तनं प्राप्य तथैव कृतवान् । राजा तु को नाम देवाधिदेव ? इत्युत्पन्नसंशयः पौरजनसमक्षं तीर्थिकसार्थमाकार्य तेभ्यः पूर्ववृत्तान्तमुदीर्य सूक्ष्मशेमुषीलक्ष्माणं तक्ष्माणमादिष्टवान्–'अत्र देवाधिदेवं निर्मापये' ति । ततश्चतुराननो विष्णुः शङ्करः स्कन्दो वेति प्रत्येकनामग्राहमुद्यम्योद्यम्य मुच्यमानाः कुठाराः कुण्ठधाराः संवृत्ताः । ततो विचित्र रसवत्यां रसवत्यां निष्पन्नायामपि व्याकुलत्वादाकारितेऽप्यनागच्छति राजनि ज्ञातवृत्तान्ता अहो ! महामोहव्यामोहितदृष्टयो देवाधिदेवमप्येते न जानन्तीति सञ्चिन्त्य जलक्षालितबहिर्मलाऽन्तर्मलक्षालनाय कृतसितवासोनेपथ्या गृहीतपूजोपचारा देवी प्रभावती तत्र

गत्वा— 'देवाधिदेवः श्रीवर्द्धमानस्वामी' इत्युक्त्वा तारधारकुठारेण तत्काष्ठं छेदयामास । ततः समुन्मीलयन्ती भव्याम्भोरुहाणि, निर्मूलयन्ती तमोनिकुरम्बाणि, सन्तोषयन्ती सच्चक्रमानसानि, निरोधयन्ती तामससत्त्वसञ्चरणानि, प्रादुर्भवदत्यद्भुतप्रभाप्राग्भार-भास्वरभास्वन्मूर्त्तिरिव निरगात्तन्मध्याद् देवाधिदेव-श्रीवीरप्रतिमेत्य-नेन सम्बन्धेन निशीथचूर्णावुक्तम्—सा नेउं रण्णा घरसमीवे देवा-ययणं काउं तत्थ ठविया । तत्थ य किण्हगुलिया नाम दासी देवयासुस्सूसकारिणी निउत्ता अट्ठमिचउद्दसीसु य पभावईदेवी भत्तिरागेण सयमेव नट्टोवहारं करेइ । रायावि तयाणुवत्तीए मुरए वाएइत्ति । ततश्चात्र चतुर्दश्यां चैत्यवन्दनमुक्तम् । तथा पुस्तक-वाचनमुपवासकरणमष्टमीचतुर्दशीदिवसे जिनदासश्रावकोऽकार्षीत् । तथा 'पौषध पुनरुदायिनृप' इति पुस्तकवाचनादिकृत्यवचनव्यक्ती-करणार्थं च जिनदासश्रावककथानकमुच्यते--

महुराए नयरीए जिणदासो वाणियओ सड्ढो सोमदासी साविया दोवि अहिगयजीवाजीवाइनवपयत्थपरमत्थाणि परिमाण-कडाणि तेहिं चउप्पयस्स पच्चक्खायं । तओ दिवसदेवसियं गोरसं गिण्हंति । तत्थ य एगा आभीरी गोरसं गहाय आगया । सा ताए सावियाए भण्णति । मा तुमं अण्णत्थ भमाहि । जत्तियं आणेसि तत्तियं गेण्हामि । एवं तासिं संगतं जायं । इमावि से गंधपुडियादि देति । इमा वि कूइगादि दुद्धं दधिं वा देति, एवं तासिं दढं सोहियं जायं । अण्णया तेसिं गोवाणं विवाहो ताहे ताणि निमंतेइ, ताणि भणंति—अम्हे वाउलाणि ण तरामो गंतुं । जं तत्थ उवउज्जति भोयणे कडुभंडादि वत्थाणि आभरणाणि धूवपुप्फगंधमल्लादि वधुवरस्स तं तेहिं दिन्नं । तेहिं अतीव सोभावियं । लोगेण य सलाहियाणि । तेहिं तुट्ठेहिं दो तिवरिसा गोणपोतलया हट्ठसरीरा उवट्ठविया कंबल-संबलत्ति णामेणं, ताणि णेच्छंति, बला बंधिउं गताणि, ताहे तेण सावएण चिंतियं जइ मुच्चंहिंति तो लोगो वाहेहिंत्ति । तो एत्थ चेव अच्छंतु

फासुगा चारी किणिऊणं दिज्जइ, एवं पोसिज्जंति। सो वि सावतो अट्ठमिचउद्दसीसु उववासं करेति पोत्थयं च वाएति। तेवि तं सोऊण भद्दया जाया सण्णिणो य जद्दिवसं सावगो ण जेमेति तद्दिवसं तेवि ण जेमंति, तस्स य सावगस्स भावो जातो। जहा इमे भविया उवसंता अब्भहितो य नेहो जातो, ते रूवस्सिणो, तस्स य सावगस्स मित्तो तत्थ भंडीरमणजत्ता, तारिसा नत्थि अण्णस्स बइल्ला ताहे तेण ते भंडीए जोएत्ता नीता अणापुच्छाए। तत्थ अण्णाण्णेण समं धावं कारिया ताहे छिण्णा तेण ते आणेउं बद्धा। न चरंति नय पाणियं पियंति जाहे सव्वहा णेच्छंति ताहे सो सावओ तेसिं भत्तं पच्चक्खाति णमोकारं च देइ। ते कालगया णागकुमारेसु उववण्णा। इओ य छउमत्थविहारेणं विहरमाणो भयवं बद्धमाणसामी सुरभिपुरं गओ। तत्थं गंगा उत्तरितव्विआ। तत्थ सिद्धदत्तो नाम नाविओ खेमिलो नाम सउणजाणओ। तत्थ य नावाए लोगो विलग्गइ। कोसिएण महासउणेण वासियं। कोसिओ नाम उलूगो। तओ खेमिलेण भणियं। जारिसं सउणेण भणियं तारिसं अम्हेहिं मारणंतियं पावियव्वं किं पुण इमस्स महारिसिस्स पभावेण मुच्चीहामो। सा य णावा पवाहिया सुदाढेण य णागकुमारराइणा दिट्ठो भगवं णावाए ठिओ। तस्स कोवो जाओ। सो य किर सीहो वासुदेवत्तणे मारिओ। सो संसारं भमिऊण सुदाढो नागो जाओ। सो ओहिनाणेण भगवंतं नावारूढं पिच्छिऊण पुव्ववेराणुबंधवससमुप्पन्नकोवो संवट्टगवायं विउव्वित्ता नावं बोलेउं इच्छइ। तो कंबलसंबलनागकुमाराणं आसणं चलियं ओहिं पउंजंति जाव पिच्छंति तित्थयरस्स उवसग्गं कीरमाणं। ताहे तेहिं चिंतियं अलाहि ता अण्णेणं सामिं मोएमोत्ति आगया। एगेण नावा गहिया एगो सुदाढेण समं जुज्झइ। सो महिड्ढिओ तस्स पुण चवणकालो इमे य अहुणोववन्नगा। सो तेहिं पराइओ। ताहे ते णागकुमारा तित्थगरस्स महिमं करेंति सत्तं रूवं च गायंति एवं लोगो वि। तओ सामी उत्तिण्णो। तत्थ देवेहिं सुरभिगंधोदयवासं पुप्फवासं च

वुट्ठं ते वि पडिगया इति ।

तथा पाडलिपुत्रे कोणिकपुत्रश्रीमदुदायिनृपमधिकृत्ये क्तं—सो राया अट्ठमिचउद्दसीसु पोसहं करेइ । तत्थ आयरिया आइंति धम्मकहानिमित्तमिति । अत्र 'अट्ठमिचउद्दसीसुमि' त्यादिवाक्येन श्रावकाणां पुस्तकवाचनपौषधोपवासकरणं चतुर्दश्यामुक्तम् । अन्यत्राप्युक्तं—

'पोसहो उववासो उण अट्ठमिचाउद्दसीसुं जम्मदिणे ।

नाणे निव्वाणे चउमासअट्ठाहि पज्जुसणे' ।। तथा 'एयं पुण'त्ति । एतत्पुनः पूर्वोक्तं तपश्चैत्यवन्दनादि सविशेषं चतुर्दश्यां भणितमावश्यकचूर्णौ आदिशब्दान्निशीथचूर्ण्यादिपरिग्रहः । 'ता' इति । तस्मात् पाक्षिकविशेषकृत्यं पाक्षिकप्रतिक्रमणतत्सहचरालोचनाद्यनुष्ठानं 'ताणं' ति । तेषां श्रावकाणां चतुर्दश्यां दिवसे विज्ञेयमिति ।।५६-५७-५८।।

ननु पञ्चदश्यामुपवासः सिद्धान्ते दृश्यते श्राद्धानां तत् किमुच्यते चतुर्दश्यामुपवास ? इत्याशङ्क्याहुः—

**जो पुण अमावसाए उववासो सातिवाहणनिवस्स ।**

**अंतेउरस्स सुव्वइ स भवे नंदीसरस्सावि ।।५९।।**

व्याख्या–यः पुनरमावास्यायामुपवासः सातिवाहननृपसम्बन्धिनोऽन्तःपुरस्य श्रूयते । स भवेन्नन्दीश्वरस्यापीति । तद्गतचैत्याराधनार्थं तत्तप इत्यर्थः । तदुक्तम्-अमावास्यायां पटलिखितनन्दीश्वरजिननिलयपूजान्वितमुपवासादीनामन्यतमन्नन्दीश्वर इति ।।५९।।

अथेदं तपो भवतु नन्दीश्वराराधनाय परं यः पञ्चदश्यां पौषधः श्रूयते श्रावकाणां स पाक्षिकप्रतिक्रमणज्ञापको भविष्यतीति गाथाद्वयेन पराभिप्रायं तृतीयगाथया चोत्तरमाविःकुर्वन्तः प्राहुः—

**अट्ठमिपंचदसीसुं कत्थइ अट्ठमिचउद्दसीसुंपि ।**

**कत्थइ तिसु वि तिहीसुं जो सावगपोसहो सुत्ते ।।६०।।**

कत्थइ देसग्गहणं कत्थइ घिप्पंति निरवसेसाइं ।
उक्कमकमजुत्ताइं सुत्ताण विचित्तभावाओ ॥६१॥
पंचदसीए जइ नाम पोसहो कह णु पक्खपडिक्कमणं ? ।
तमुवासेण चउद्दसि-मुल्लंघेउं न सो जुत्तो ॥६२॥

व्याख्या—'अष्टमीपञ्चदशीषु अष्टमीचतुर्दशीष्वपि कुत्रचिदि' ति

'सव्वेसु कालपव्वेसु पसत्थो जिणमए तवो जोगो ।

अट्ठमिपण्णरसीसुं नियमेण हविज्ज पोसहिओ' ॥ इत्युल्लेखेन तथा 'सो राया अट्ठमि-चउद्दसीसु' पोसहं करेइ' इत्युल्लेखेन च द्वयमप्यावश्यकचूर्णौ। तथा कुत्रचिदिति 'चाउद्दसि अट्ठमिउदिट्ठपुण्णिमासीणीसु पडिपुण्णं पोसहं पालेमाणा विहरंति।' इत्यालापकेन निशीथदशाश्रुतस्कन्धादौ त्रिसृष्वपि तिथिषु यः श्रावकाणां पौषधः सूत्रे दृश्यते। स पञ्चदशीपाक्षिकप्रतिक्रमणज्ञापको भविष्यतीतिशेषः।

अथोच्यते-पञ्चदश्यां पौषधः सर्वसूत्रे नोपलभ्यते तत्कथं ज्ञापकः स स्यादिति। तत्राहुः-'कत्थइ'त्ति। कुत्रचिदपि सूत्रे देशग्रहणमर्थैकदेशग्रहण भवति, तेन च सजातीयं सर्वं ज्ञाप्यते। यथा कल्पस्य 'आमे तालपलंबे' इत्यादिप्रथमसूत्रे प्रलम्बग्रहणेन शेषवनस्पतिभेदाः कन्द-स्कन्ध-त्वक् शाखा-पत्र पुष्प-बीजादयो ज्ञाप्यन्ते। यद्वा-क्वापि बीजग्रहणेन तदितरे ज्ञाप्यन्ते। तथा कुत्रचिन्निरवशेषाणि वस्तूनि गृह्यन्ते। यथा—

कोहो य माणो य अणिग्गहीया माया य लोभो य पवड्ढमाणा।
चत्तारि एए कसिणो कसाया सिंचंति मूलाइं पुणब्भवस्स॥ इत्यत्र सर्वकषायग्रहणमिति। तथोत्क्रमक्रमयुक्तानि कुत्रचिद्वस्तूनि भण्यन्ते। तत्रोत्क्रमो यथा—आचाराङ्गप्रथमशस्त्रपरिज्ञाध्ययने पृथिव्यादिक्रम-मुल्लङ्घ्य मुग्धबुद्धीनां सुखेन सजीवताप्रतिपत्त्यर्थं जीवत्वेन वनस्पतिं निरूप्य पवनप्रत्यायनं। क्रमस्तु गोचरपिण्डेषणादौ। पेडार्द्धपेडादि-

गोचरचर्याभिग्रहाणां संसृष्टासंसृष्टादिपिण्डेषणानां तत्राऽऽचारे क्रमेणैव प्रतिपादनात्। कुत एतत्? कुत्रचित् सूत्राणां विचित्रभावादिति। यथोक्तं—

देसग्गहणे बीएहिं सूइया मूलमाइणो सव्वे।
कोहाइ अणिग्गहिया सिंचंति भवं निरवसेणं (सं) ॥१॥

सत्थपरिण्णा उक्कम गोयरपिंडेसणा कमेणं तु।
जं पिय उक्कमकरणं तंपिऽभिणवधम्मबोहट्ठा ॥२॥

तस्मादत्र देशग्रहणन्यायात् व्याप्त्या पञ्चदश्यां पौषधे सिद्धे तत् प्रतिक्रमणममावास्यायां स्यादित्यत्राहुः—'पन्चदसि'त्ति। पञ्चदश्यां यदि नाम पौषधः स्यात् कथं नु पक्षप्रतिक्रमण नैव स्यादित्यर्थः। तत्—प्रतिक्रमणस्य पौषधेन सह प्रतिबन्धभावात्। उपवासालोचनादिभिः सहैव तस्य प्रतिबन्धात्। अत एवाहुः—'तमुवासेण'ति। तदिति पक्षप्रतिक्रमणमुपवासेनोपलक्षणत्वादालोचनादिभिश्च कृतैरेव कर्त्तव्यम्। स चोपवासश्चतुर्दशीमुल्लङ्घ्य न युक्तस्तस्यामेवोक्तप्रकारेण भावात्। आलोचनादीनामपि तत्रैव समर्थितत्वादिति।

यद्यपि—'पोसहं दुहओ पक्ख एगराइ न हायए' इत्युत्तराध्ययनवचनात् प्रतिक्रमणं भणितं। तदप्ययुक्तं—एतद्व्याख्याने 'सितेतरयोश्चतुर्दशीपौर्णमास्यादितिथिषु' इति। एतस्मिन् तत् प्रतिक्रमणाभणनात् पौषधस्य तु तत्प्रतिक्रमणाज्ञापकत्वादित्युक्तमिति। मूलव्याख्यानं तु किलैवमत्र श्रूयते। पराभिप्रायव्यक्तीकरणाय सामान्येन तावद् गाथाद्वयमाहुः— 'अट्ठमि' त्ति। 'कत्थइ' त्ति। अष्टम्यादि तिथिगतवैचित्र्येण यः श्रावकाणां पौषधः सूत्रे श्रूयते स सूत्राणां वैचित्र्याद् देशग्रहणन्यायेन सर्वसूत्रेषु तिथित्रयव्याप्त्या पौषधग्रहणसिद्धे न सूत्राणां परस्परविरुद्धत्वदोषावह इति भावः।

नन्वेवमुक्तन्यायात् सर्वत्र पञ्चदश्यां पौषधग्रहणे सिद्धे तदाक्षिप्तं पाक्षिकप्रतिक्रमणमपि तस्यां स्यादिति पराशङ्कां चेतसि निधायो-

त्तरमाहुः– 'पंचदसीए' इति । तत्त्वतस्तु तद्द्वयोरपि व्याख्यानयोर्भेद इति ॥ ६०-६१-६२ ॥

पुनर्माध्यस्थ्यमवलम्बमानाः पराभ्युपगमे दुर्निरोधविरोधोपसंहार-माहुः—

**अम्हाणमभिनिवेसो न कोइ इत्थ परमरणाहा सुत्तं ।**<br>
**अघडतं पि च पुव्वावरेण पडिहाइ किं करिमो ? ॥६३॥**

व्याख्या–पाठसिद्धैव ॥६३॥

अथ लोके पञ्चदश्यां पूर्णपक्षप्रसिद्धिः, सिद्धान्ते च–'पक्खियं पडिक्कमियव्व'मित्युक्तं, ततः पञ्चदश्यामेव तत् सिद्धयतीति परा–शङ्काशङ्कुसमुद्धरणार्थं निशीथगाथामाहुः—

**जं जह सुत्ते भणियं तहेव जइ तव्वियारणा नत्थि ।**<br>
**किं कालिआणुओगो दिट्ठो दिट्ठिप्पहाणेहिं ? ॥६४॥**

व्याख्या–यद्-एकाकिविहारादि 'यथा' येन प्रकारेण गुणाधिक-सहायालाभादिना सूत्रे 'न या लभिज्जा निउणं सहाय' मित्यादिरूपे भणितम्-उक्तम् । तथैव–तेनैव प्रकारेण यदि–चेत् तत्सूत्रं, किमुक्तं भवति-विचारणा-विषयविभागकल्पना नास्ति-यदि न विधेया भवति, तदा 'किं' केन हेतुना कालिकानुयोगः–उत्तराध्ययनादिकालिकश्रुतस्य द्वितीयपौरुष्यां व्याख्यानरूपो दृष्टोऽनुमतो दृष्टिप्रधानैस्तीर्थकरगणधरा-दिभिः । अतोऽनुयोगकरणात् ज्ञायते पूर्वापराविरोधेन सूत्रं व्याख्येयं,

यस्माद्—'उस्सग्गसुयं किं वा किं वा अववाइयं मुणेयव्वं ।

तदुभयसुत्तं किं वा सुत्तस्स गमा मुणेयव्वा' ॥ इत्यागमादनेक–प्रकारस्य सूत्रस्य व्याख्यानादेव सम्यगर्थप्रतिपत्तिः । ततोऽत्रापि 'पक्खिए पक्खिय'मिति यत् सूत्रं तत् तथैव न ग्राह्यं किन्तु लोकहेरि

परित्यज्य पूर्वोक्तप्रकारतो व्यवहाराद्यन्यग्रन्थाविरोधेन व्याख्येय-मिति ॥६४॥

अमुमेवार्थं सङ्कलय्योपसंहरन्ति—

**पुव्वावरेण परिभाविऊण सुत्तं पयासियव्वमिणं।**
**जं वयणपारतंतं एवं धम्मत्थिणो लिंगं ॥६५॥**

व्याख्या--पौर्वापर्येण परिभाव्य-पूर्वापरव्यवस्थितसूत्रार्थपरामर्श-विरोधसंकलनपूर्वं 'सूत्रमिद' मिति-पक्खिप पक्खियमित्येवंरूपं व्याक्रियमाणत्वेन प्रत्यक्षं प्रकाशयितव्यं-पूर्वापरसूत्रार्थाविरुद्धचतुर्दशीलक्षणेऽर्थे व्यवस्थापनीयम्। न पुनर्लोकयात्रामात्रानुवर्त्तितया निज-कुहेवाकसमर्थनाय पञ्चदश्यां योजनीयम्। उत्सूत्रप्ररूपणायाः संसारहेतुत्वात्। यथोक्तं—

'फुडपागडमकहिंतो जहट्ठियं बोहिलाभमभिहणइ।
जह भगवओ वि सालो जरमरणमहोअही आसि' ॥ त्ति 'जं वयण'त्ति। यद् वचनपारतन्त्र्यं—तीर्थकराज्ञापारवश्यमेतद्धर्मार्थिनो लिङ्ग-चिह्नमिति। यथोक्तं—

'समयपवित्ती सव्वा आणाबज्झ त्ति भवफला चेव।
तित्थगरुद्देसेण वि न तत्तओ सा तदुद्देसा ॥१॥
मूढा अणाइमोहा तहा तहा एत्थ संपयट्टंता।
तं चेव य मण्णंता अवमण्णंता न याणंति' ॥२॥

अन्यत्राऽप्युक्तं-तित्थयराणा मूलं नियमा धम्मस्स तीए वाघाए।
किं धम्मो किमधम्मो मूढा नेवं वियारंति ॥१॥
मोहविसपरममंतो सिवसोक्खफलस्स कप्पतरुकंदो।
तित्थगराणा जम्हा तम्हा एईए जइयव्वं' ॥ इति ॥६५॥

सम्प्रति पाक्षिकावश्यकं निःशङ्कं प्रपञ्च्य प्ररूप्य 'दिवसनिसापक्खियाइभेएण' मित्यादिपदोपात्तं चातुर्मासकावश्यकं तावन्निरूपयन्ति–

**चउमासगाइ पुव्वोइयंमि दिवसे जमएणहेयाणिं ।**
**पायं छट्ठस्सासत्तिओ अ आयरणओ चेगे ॥६६॥**

व्याख्या––चतुर्मासकानि पूर्वोदिते (दिवसे) पौर्णमासीदिने पूर्वमासन् यत्त्विदानीमन्यथा चतुर्दश्यां क्रियते तत्र हेतुद्वयं, तदेवाहुः–प्रायः षष्ठस्याशक्तितश्च–साम्प्रतमनुष्याणां बाहुल्येन षष्ठतपसः करणे शक्तेरभावादिति । आचरणतश्च बहुभिरशठैराचीर्णत्वादिति । अत्र च यदि चतुर्थ्यां पर्युषणे कृते सति पौर्णमास्यां चातुर्मासकं क्रियते तदा–'पण्णासाए पज्जोसवेयव्व'मिति न पूर्यते । पौर्णमासीतश्चतुर्थीं यावदेकोनपञ्चाशद्दिनानामेव भावात् । तथा–'पज्जोसविए सत्तरीए पडिक्कमित्तु विहरियव्व' मित्यपि बद्धते । पर्युषणाचतुर्थीतः पौर्णमासीं यावदेकदिनाधिकायाः दिनसप्ततेः सम्भवात् । तत एतत्सूत्रं प्रमाणं कुर्वाणैराचीर्णमित्याद्याचरणाकारणं वाच्यमिति । चकारौ समुच्चये । अत्र च स्वातन्त्र्यपरिहारार्थमाहुः–'एगे' इति । एके पूर्वाचार्या एवमामनन्तीति ॥६६॥

अथादिशब्दोपात्तमेव सांवत्सरिकावश्यकं निरूपयन्ति—

**परओ ज्जकालगाओ भद्दवए सेयपंचमीदिवसे ।**
**वारसिअं संपइ पुण तेणेव कयं चउत्थीए ॥६७॥**

व्याख्या––परतः आर्यकालकात्–श्रीमदार्यकालकाचार्यकालात् पूर्वं, अस्य चोपलक्षणत्वात् तत्कालेऽपि कृताचरणायाः पूर्वं यः भाद्रपदश्वेतपञ्चमीदिवसः तत्रासीद् वार्षिकं, सम्प्रति पुनस्तेनैव भगवता प्रथमानुयोगादिग्रन्थसूत्रणासूत्रधारेण सातवाहननृपतेः पञ्चम्यामिन्द्रानुज्ञापनमहोत्सवव्याकुलतया चैत्यसाधुवन्दनादिकं पर्युषणा-

पर्वकृत्यं कर्तुमशक्नुवतो वचनमनुवर्त्तयता तदनुवर्त्तनया च प्रभावनाद्यधिकधर्मातिशयमुत्तरकालमालोक्य कृतं–विहितं चतुर्थ्यां ततश्च–'असढेहिं समाइण्ण' मित्याद्याचरितलक्षणयोगात्।

'अवलंबिऊण कज्जं जं किंची आयरंति गीयत्था।

थेवावराह बहुगुण सव्वेसिं तं पमाणं तु॥ इतिवचनविमर्शाच्च प्रमाणीकृतम् तत्कालोत्तरकालवर्त्तिभिरन्यैरपि बहुश्रुतैरिति। तथा च परमागमनिशीथचूर्णिः-पव्वे पज्जोसवेयव्वं नो अपव्वे। सीसो पुच्छइ-इयाणिं कहं चउत्थीए अपव्वे पज्जोसविज्जइ? आयरिओ भणइ–कारणिया चउत्थी अज्जकालगायरिएण पवत्तिया। कहं? भण्णइ कारणं-कालगायरिओ विहरंतो 'उज्जेणिं' गओ। तत्थ वासावासं ठिओ। तत्थ नयरीए 'बलमित्तो' राया तस्स कणिट्ठो भाया 'भाणुमित्तो' जुवराया। तेसिं भगिणी 'भाणुसिरी' तीसे पुत्तो बलभाणु नाम सो य पगइभद्दय भद्दविणीययाए साहू पज्जुवासइ। आयरिएहिं से धम्मो कहिओ पडिबुद्धो पव्वाविओ य। तेहिं य बलमित्तभाणुमित्तेहि रुट्ठेहिं कालगज्जो अपज्जोसविए निव्विसओ कओ।

केई आयरिया भणंति-जहा बलमित्त-भाणुमित्ता कालगायरियाणं भागिणिज्जा भवंति। 'माउल'त्ति काउं ते महंतं आदरं करेंति अब्भुट्ठाणाइयं। तं च पुरोहिअस्स अप्पत्तियं। भणइ य–एस सुद्दपासंडो वेयाइबाहिरो रण्णो अग्गओ पुणो पुणो उल्लवितो आयरिएण निप्पिट्ठपसिणवागरणो कओ। ताहे सो पुरोहिओ आयरिअस्स पउट्ठो रायाणं अणुलोमेहिं विप्परिणमेइ। एए रिसिणो महाणुभावा एए जेण पहेण गच्छंति, तेण पहेण जइ रण्णो जणो गच्छइ पयाणि वा अक्कमइ तो असेयं भवइ। तम्हा विसज्जेहि ताहे विसज्जिया। अण्णे भणंति-रण्णा उवाएण विसज्जिया। कहं? सव्वंमि नगरे किल रण्णा अणेसणा कारविया। ताहे ते निग्गया एवमाइयाण कारणाण अन्नतमेणं निग्गया विहरंता पइट्ठाणनगरंतेण पट्ठिया पइट्ठाणसमणसंघस्स अज्ज-

कालगेहिं संदिट्ठं जावाहं आगच्छामि ताव तुब्भेहिं नो पज्जोसवियव्वं। तत्थ य 'सायवाहणो' राया सावओ सो कालगज्जं इंतं सोउं निग्गओ अभिमुहो समणसंघो य। महाविभूइए पविट्ठो कालगज्जो पविट्ठेहिं भणियं-भद्दवयसुद्धपंचमीए पज्जोसविज्जइ, समणसंघेण पडिवन्नं ताहे रण्णा भणियं। तद्दिवसं मम लोगाणुवत्तीए इंदो अणुजाणियव्वो भविस्सइ साहुचेइए न पज्जुवासिस्सं तो छट्ठीए पज्जुसवणा कज्जउ। न वट्टइ अइक्कमेउं ताहे रण्णा भणियं-तो अणागयं चउत्थीए पज्जोसविज्जइ। आयरिएहिं भणियं-एवं भवउ। ताहे चउत्थीए पज्जोसवियं। एवं जुगप्पहाणेहिं कालगज्जेहिं चउत्थी कारणे पवत्तिया सच्चेव अणुमया सव्वसाहूणवि इति ॥६७॥

अथ द्रव्यक्षेत्रकालावश्यकानि निरूप्य भावावश्यकं निरूपयन्तः आहुः-

उद्धरिअसव्वसल्लो पुव्वुत्तविसेसतवसमाउत्तो।
तल्लेस्सो तच्चित्तो य भावओ कुणउ सव्वमिणं ॥६८॥

व्याख्या—उद्धृतसर्वशल्यो—माया-निदान-मिथ्यादर्शनरूपशल्यत्रयोद्धारादवाप्तसुखासिकः पूर्वोक्ते पक्षादिकृत्ये चतुर्थादिविशेषतपः—स्वरूपे विषयभूते सम्यग्—अवैपरीत्येनाऽऽयुक्तो—उपयोगवान्। तथा तस्मिन्नावश्यके लेश्या-कृष्णादिद्रव्यसाचिव्यजनितात्मपरिणामरूपा यस्य स तल्लेश्यः। तथा तस्मिन्नावश्यके सामान्योपयोगरूपं चित्तं यस्य स तच्चित्तः। चशब्दात्तन्मनास्तदध्यवसानस्तदर्पितकरणस्तदर्थोपयुक्तस्तदेकमनास्तदनुरागपर इत्यादिशेषविशेषणकलापः परिगृह्यते। ततश्चैतद्विशेषणविशेषितो भावतः करोतु सर्वमिदं द्रव्यावश्यकादि। भाव भावे तु तत्क्षणं परमानन्दस्वरूपशिवसौख्यासम्पादकत्वादल्पफलमेव।

यदुक्तं—क्रियाशून्यस्तु यो भावो भावशून्या च या क्रिया।

अनयोरन्तरं ज्ञेयं भानुखद्योतयोरिव' ।। इति । इत्थं तत्त्वभेदव्याख्या ख्यापिता पूज्यैः । पर्यायव्याख्या तु सुखोन्नेयत्वान्नोक्ता परमित्थं ज्ञातव्या ।

आवस्सयं अवस्सकरणिज्जं धुवनिग्गहो विसोही य ।

अज्झयणछक्कवग्गो णाओ आराहणामग्गो ।। धुवनिग्गहोत्ति । अनादित्वात् प्रायोऽनन्तत्वाच्च ध्रुवं-कर्म तत्फलभूतो वा भवस्तस्य निग्रहः । तथा नैयत्येन जीवकर्मसम्बन्धव्यवहारापनयनान्न्यायः । शेषं सुगमम् ।।६८।।

अथैतस्य चतुर्विधस्यापि करणफलमुपदर्शयन्तः प्राहुः—

**दव्वाइसुद्धमेयं धीरा आवस्सयं विहेऊणं ।**
**पाविंति पावणिज्जं णिरवज्जं मुक्खसुक्खंति ।।६९।।**

व्याख्या—द्रव्यं तावद्—

'भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके ।

तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम्' ।। इत्येवं लक्षणलक्षितं साध्वादि, आदिशब्दसूचितं च क्षेत्रं गुरुसमीपादि, कालश्च दिवसादिः, भावश्चोपयोगप्रधानत्वादिः एतैः शुद्धं, शुद्धता चास्य द्रव्यादिभिस्तदैव भवति यदि प्रागुक्तानि साध्वादीनि द्रव्यादीनि भवन्ति, तद्विपरीतानि तु मिथ्यादृष्टि-क्षेत्रान्तर-कालान्तर-भावशून्यत्वादीनि द्रव्याद्याभासानि तैरपरिशुद्धमेवैतदिति भावः । ततो द्रव्यादिभिः शुद्धमेतत् 'सामाइय चउवीसत्थयाई' त्यादिगाथोक्तसामान्यलक्षणलक्षितमावश्यकं हेयोपादेयविवेकवत्या धिया राजन्त इति धीराः-स्थिरप्रतिज्ञाः विधाय—कृत्वा विचित्रव्रतचर्यया प्रापणीयं, तथा—

'स्मरज्वरजरामुख्या दोषा भवभुवोऽत्र ये ।

सर्वथा ते न सन्त्येव यत्र तत्परमं पदम् ।। इति स्वयमेव पूज्यपादोपदर्शितप्रकारेण प्रत्यासत्तिमात्रप्रकटीकृतमधुरत्वात् किम्पाक-

प्रतिमैर्विषमैर्विषयैस्तथा सद्य एव जनितनितान्तसन्तापतान्तिभिर्जन्म-जरारोगशोकादिदुरन्तदुःखैर्दोषरूपैरदूषितत्वान्निरवद्यम्। यत्-कृत्स्न-कर्मक्षयलक्षणे मोक्षे सिद्धानां तस्य वा सुख-परमाह्लादरूपं संसारो-त्तमानुत्तरसुरसौख्यादप्यनन्तानन्तगुणं तत्प्राप्नुवन्तीति ॥ ६॥

सम्प्रति प्रस्तुतप्रकरणस्यावश्यकसप्तत्याख्यस्य पाक्षिकसप्तत्य-परनामधेयस्य प्रयोजनं प्रकटयन्तः स्वप्रज्ञामात्रपरिकल्पितत्वं निर्युक्तिकत्वं च परिहरन्तः प्राहुः—

**मुणिचंदसूरिणा सुमरणत्थमिणमप्पणो पवयणाओ ।**
**उद्धरियं जुत्तिजुअं परेसि संबोहणत्थं च ॥७०॥**

इति पाक्षिक-सत्तरी ।

व्याख्या:-- मुनिचन्द्रसूरिणेत्यौद्धत्यपरिहारार्थमेकवचनम्। आत्मनः स्मरणार्थमित्यनेन प्रधानप्रयोजनमुक्तं, स्मरणं च प्रक्रमा-दावश्यकस्वरूपस्यैव, इदमावश्यक-सप्तत्याख्यं प्रकरणं प्रवचनात्-महानिशीथ-कल्पव्यवहार-दशाश्रुतस्कन्धावश्यकचूर्णिप्रमुखाच्चतुर्दश-पूर्वक्षीरार्णवसुधारसस्वरूपादुद्धृत न पुनः स्वमतिमात्रपरिकल्पितं, तत एव युक्तियुतं-पूर्वोक्तप्रकारेण पूर्वापराविरुद्धयुक्तिजालकलितं परेषां विप्रतिपन्नानां तद्विप्रतार्यमाणान्यजन्तूनां च सम्बोधनार्थं च-सम्यक यथावस्थिततत्त्वप्रदर्शनेन बोधनार्थं च, न केवलमात्मस्मरणार्थं, चेत्यानुषङ्गिकप्रयोजनसमुच्चय इति ॥७०॥

श्रीदेवसूरिसुगुरोः स्फुटनाममन्त्र—
नित्यस्मृतिस्तदुपदेशवशेन वृत्तिम्।
श्रीमन्मुनीन्द्र-मुनिचन्द्रकृतावमुष्यां
सूरिर्महेश्वर इति प्रकटीचकार ॥१॥

सिद्धान्ततर्कसाहित्यलक्षणेषु विचक्षणः।
वज्रसेनसुधीरस्मत्साहाय्यं कृतवानिह ॥२॥

मूलग्रन्थनिरीक्षणोत्सुकमनाः कृत्वा तदन्वेषणां
प्रादुर्भूतगुरुक्तिनिश्चलमतिर्वृत्तिं यतो निर्ममे ।
तद्युष्माभिरशेषशास्त्रहृदयग्राहिस्फुरन्निर्मल-
प्रज्ञैरज्ञजनैरिवात्र न मनः कार्यं समारोपतः ॥३॥

विपक्षाक्षेपविक्षेपवलक्षं दिक्षु यद्यशः
मतिः सिद्धान्तशुद्धा च तत्सद्यः फलमस्य नु ॥

इति श्रीमुनीन्द्रश्रीमुनिचन्द्रसूरिविरचितायामावश्यकसप्ततिकायां
श्रीदेवसूरिपूज्यपादपद्मोपजीविना श्री महेश्वराचार्येण
विरचिता सुखप्रबोधिनी वृत्तिः समाप्ता ।